भाग २ } १३२५ मिताब्दस्य ३ यांशी
Vol, 2 } JANUARY–MARCH, 1919.

संस्कृत–भारती ।

आंगल-भाषा-परिशिष्ट-समेता ।

त्रैमासिकी साहित्य-पुराण-दर्शन-विज्ञानात्मिका

SAMSKRITA BHARATI

WITH AN ENGLISH SUPPLEMENT,

A QUARTERLY ANGLO-SANSKRIT MAGAZIN

OF LITERATURE, SCIENCE AND ARTS.

बंग–मद्र–विहार–उत्कल–युक्तप्रदेश–आसाम–मध्यप्रदेश–वि

बरदा–काश्मीराख्य जनपदानां महात्मभिः शासकसङ्घैः

कृपयानुमोदिता कृतसाहाय्यका च

ंबई–पञ्जाम्बु–जनपदानां महात्मभिः राजकीयशिक्षाधिकारि

कृपयानुमोदिता

लिकाता-मुंबइ-महोसुर-विश्वविद्यावेश्माधिकारिभिः महात्म

कृपयानुमोदिता च

Patronised by the Governments of Bengal, Mad
J. Provinces and Oudh, Behar and Orissa,

by the Administrations of Assam, C. P. and Bera

„ „ Governments of Baroda, Kashmir and Jam

pproved „ „ Education Departments of Bombay and Punjab,

and „ „ Universities of Calcutta, Bombay and Myso

प्रकाशकाः–महामण्डलमुद्रणयन्त्राध्यक्षाः (वाराणस्याम्)

वार्षिक मूल्यम् ५) ... ... (प्रेरणव्ययसमेत

Annual Subscription ... Rs. 5 (inclusive of postage

संस्कृतभारती

SAMSKRITA BHARATI SUPPLEMENT.

"সংস্কৃত ভারতী"

(ইংরাজী পরিশিষ্ট সমেত)

াহিত্য, পুরাণ, দর্শন ও বিজ্ঞান বিষয়ক ত্রৈমাসিক সংস্কৃত পত্রিকা।

লা-মান্দ্রাজ-বিহার ও উড়িষ্যা-যুক্তপ্রদেশ ও অযোধ্যা-আসাম-মধ্যদে

বেরার-বরদা এবং কাশ্মীর প্রভৃতি রাজ্যগুলির মহামান্য গবর্ণমেণ্ট সমূহ

কর্ত্তৃক অনুমোদিত ও কৃতসাহায্যক।

ম্বাই ও পঞ্জাব প্রদেশদ্বয়ের রাজকীয় শিক্ষাবিভাগ কর্ত্তৃক অনুমোদিত।

কাতা, বোম্বাই ও মহীশূর প্রদেশত্রয়ের বিশ্ববিদ্যালয় কর্ত্তৃক অনুমোদিত।

বার্ষিক মূল্য (প্রেরণ ব্যয় সমেত)--৫৲

প্রাপ্তিস্থান—পোষ্ট অফিস ও সহর বর্দ্ধমান, বঙ্গদেশ।

कृपया विज्ञप्तिफलके स्थापनार्थं अन्यथा वा प्रचारार्थम् ।

'संस्कृतभारती'कार्य्यालयः—वङ्गानां वर्द्धमाननगरे ।

संस्कृतभारती (विशिष्ट-विद्वत्-संघेन सम्पादिता) 'आंगल' परिशि-
समेता त्रैमासिकी साहित्य-पुराण-दर्शन-विज्ञानात्मिका ।

वार्षिकमूल्यम् प्रेषणव्ययसमेतम् अग्रिमम्

परिशिष्टसहिताया:	संस्कृतभारत्याः ...	... ...	५)	रूप्यकाः
	संस्कृतभारत्या ...	... ...	३॥)	रूप्यकाः
	आंगलपरिशिष्टस्य ...	... ...	१॥)	रूप्यकाः

'कालेज'–उच्च–इंराजिक–शिक्षकशिक्षणादि–मुख्यविद्यालयेषु चतुष्पाटीषु, पुस्तकागारेषु साहित्य-विज्ञान-शिल्पादिप्रसारसमितिषु अन्यत्र च, संस्कृतानुरागिनाम् शिष्टानां भद्रमुख्यानां व्यवहारार्थञ्च–

संस्कृतसमिति-परीक्षा-यन्त्रादीनां-आयुर्वेदोक्तभेषजानां विषयान्तराणां विज्ञप्तिप्रचाराय । धनवन्तो महात्मानः पत्रिकाग्रहणं, विद्वांसः पुनः तथाभूताः प्रबन्धान् याच्यन्ते ।

वंग–मद्र–विहार–उत्कल–युक्तप्रदेश–आसाम–मध्यदेश–विदर्भ–वरदा–कश्मीरख्यातानाम् जनपदानां पुण्यश्लोकैः महात्मभिः शासकसंघैः अनु–मोदिता कृतसाहाय्यका च ।

श्रीप्रफुल्लचरण वन्द्योपाध्यायः
सहः कर्म्माध्यक्षः ।

संस्कृत-भारती ।

प्रबन्धसूची-२य वर्षीय प्रथमांकस्य ।

प्रबन्धसूची–२ य वर्षीयद्वितीयांकस्य ।

संस्कृत-भारती ।

प्रबन्धसूची–२य वर्षीय तृतीयांकस्य ।

নিবন্ধ-সূচী ।

[illegible]

[illegible]	[illegible]	[illegible]
[illegible]	১২৯–১৩০ পৃষ্ঠায়	[illegible]
[illegible]	১৩১ "	[illegible]
[illegible]	১৩১–১৩৪ "	[illegible]
[illegible]	১৩৪–১৩৭ "	[illegible]
[illegible]	১৩৮–১৪০ "	[illegible]
[illegible]	১৪০–১৪৭ "	[illegible]
[illegible]	১৪৭–১৫৮ "	" " "
[illegible]	১৫৭–১৬০	
[illegible]	১৬০–১৬৩ "	[illegible]
[illegible]	১৬৩–১৬৪ পৃষ্ঠায়	[illegible]
[illegible]	১৬৫–১৬৮ পৃষ্ঠায়	[illegible]
[illegible]	১৬৯–১৭৫ "	[illegible]
[illegible]	১৭৫–১৭৬ "	[illegible]
[illegible]	১৭৭–১৯৬ "	[illegible]
[illegible]	১৯৩–২০০ "	[illegible]
[illegible]	২০১–২০৮ "	[illegible]

संस्कृत-भारती ।

संस्कृत प्रवन्धसूची-२य वर्षीय चतुर्थाङ्कस्य ।

संस्कृतभारतीसेवकाः ।

अध्यापक श्रीयुक्त अक्षयकुमारशास्त्रि-काव्य-सांख्य-वेदान्त-मीमांसा-सर्वदर्शनतीर्थः
(कलिकाता)

श्रीयुक्तताराकण्ठभट्टाचार्य्यः, एम्, ए, बि, एल्, व्यवहाराजीवः (,,)

पण्डित श्रीयुक्त जगन्नाथमिश्रतर्क-सांख्य-न्यायतीर्थः (कटक)

,, ,, सुरेन्द्रमोहनभट्टाचार्य्यकाव्य-व्याकरण-पुराणतीर्थः (ढाका)

,, ,, आशुतोषसेनगुप्तः एम्, ए, (बांकिपुर)

,, ,, हेमचन्द्ररायकविभूषणः एम् ए०, (पावना)

,, ,, वीरेश्वरकाव्य-तर्कतीर्थः (वर्द्धमान)

कार्य्यगृहम्—वंगदेशान्तर्गतवर्धमाननगरम् ।

मूल्यम् वार्षिकमग्रिमं प्रेषणव्ययसमेतं आंगलपरिशिष्टसमेतायाः संस्कृतभारत्याः···
राजतमुद्रापञ्चकमेव ।

,, ,, ,, ,, ,, संस्कृत-भारत्याः···सार्द्धराजतमुद्रात्रयमेव ।

,, ,, ,, ,, ,, आंगलपरिशिष्टस्य···सार्द्धराजतमुद्रैका ।

विज्ञप्तिः ।

संस्कृतभारतीपत्रिकाग्राहकाणां संग्रहणाय, कलिकाता-ढाका-दिल्ली-पाटना-वाराणसी-आलहाबाद-लाहोर-नागपुर-पुना-बोम्बे-माद्राज-पुरीनामधेयनगरेषु श्रमशीला आंगलसंस्कृतविदः केचन चरित्र-वन्तो युवानोऽपेक्ष्यन्ते । प्रशंसापत्रानामनुलिपिभिः सह वर्धमाननगरे कर्म्माध्यक्षसकाशमावेदनपत्रं प्रेषणीयम् । भृतिनिर्देशस्तु आवेदकैरेव करणीयः ।

मुद्रणस्थानम्—वाराणसीधाम ।

प्रचारकाः—महामण्डलमुद्रणयन्त्राध्यक्षाः ।

प्रबन्धेषु व्यक्तानां मतानां भावानां च गुणदोषभागित्वं यथास्वं
प्रबन्धकृतामेव, नतु पत्रिकासम्पादकानाम् ।

विशेषतो द्रष्टव्यम्—संस्कृतभारत्यां प्रकाशितानां प्रबन्धानां आंगलपरिशिष्टे
विपरीतरीत्या वा अनुवादो न प्रकाश्यते ।

पत्रिकां ग्रहीतुकामाः स्वं स्वं नाम, वासस्थानं, 'डाक' गृहं मण्डलं प्रदेशञ्च
विस्पष्टैः अक्षरैः लिखेयुरिति ।

श्रीप्रफुल्लचरणवन्द्योपाध्यायः,
सहकारी कर्म्माध्यक्षः ।

नीतिवाक्यानि ।

चण्डालोऽपि द्विजश्रेष्ठः हरिभक्तिपरायणः ।
हरिभक्तिविहीनस्तु द्विजोऽपि श्वपचाधमः ॥ (महानिर्वाणतन्त्रम्)

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥ (हितोपदेशः)

उत्थानवीरः पुरुषः वाग्वीरानधितिष्ठति ।
उत्थानवीरान् वाग्वीरा रमयन्त उपासते ॥ (महाभारत-शान्तिपर्व)

शोकं विसृज्याद्य धृतिं भजस्व, सोत्साहता चास्तु विमार्गणेऽस्याः ।
उत्साहवन्तो हि नरा न लोके, सीदन्ति कर्मस्वतिदुष्करेषु ॥
(रामायण-आरण्यकाण्डम्)

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥ (गीता-१२श अध्यायः)

न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ (मनु-२य अध्यायः

बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ (मनु-७म अध्यायः)

पत्रिकानियमाः ।

(१) इदं पत्रकं ग्रहीतुकामाः स्वानि नामानि धामानि च स्पष्टं कर्म्माध्यक्षाय वर्धमाननगरे विज्ञापयेयुः । मूल्यादिकं सर्व्वं तत्सकाशं प्रेष्येत । ग्रहीतुः स्थानपरिवर्त्तनादिकमपि तस्मै ज्ञाप्येत ।

(२) पत्राणां उत्तरं प्रेप्सुभिः प्रेषणव्ययः प्रेरणीयः । शुल्कहीनम् अल्पशुल्कं वा पत्रं न गृह्यते ।

(३) पत्रिकायाः यश्च खण्डः यस्य प्रबन्धेनालङ्क्रियते स च खण्डः तस्मै मूल्यं विनैव दीयते ॥

(४) अस्मिन् पत्रके विज्ञापनप्रचारनियमादिकं कर्म्माध्यक्षसकाशात् ज्ञेयम् ।

(५) अत्र पत्रके आधुनिकराजनीतिं विहाय विषयान्तराणि अधिकृत्य प्रबन्धाः प्रकटीभविष्यन्ति । जनगतः साम्प्रदायिकः वर्णाश्रमसंश्रितः धर्म्मसम्पृक्तः जातिविषयको वा विद्वेषः यत्र प्रबन्धे प्रकटीभविष्यति न स पत्रकेऽस्मिन् प्रकाशयिष्यते ।

(६) प्रबन्धाः पुस्तकानि पत्रकाणि च सर्व्वाणि वर्धमाननगरे श्रीयुक्त उमाचरण वन्द्योपाध्यायस्य समीपं प्रेषयितव्यानि ।

(७) काव्यालङ्कारादीनां धर्म्मशास्त्राणां पुराणेतिहासानां वेदवेदाङ्गादीनां च अंशविशेषाः अतिसरलव्याख्यया समेताः तदाश्रिताः प्रबन्धाः च अत्र ग्रथिष्यन्ते । अप्रकाशितानि काव्यानि विशदव्याख्यया अलङ्कृतानि मुद्रयिष्यन्ते । प्रकाशितानां प्रसिद्धानां ग्रन्थानां बालकैरपि सुखेन अवगन्तुं शक्यं भाष्यटीकादिकं अत्यादरेण मुद्रयिष्यते । प्रख्यातेभ्यः पुस्तकेभ्यः उद्धृतानां अंशानां यथायथं ऋजुव्याख्यानेन प्रकटनं अत्र भविष्यति ।

(८) यूरोपवास्तव्यैः प्रवर्त्तिताः आधुनिकीः शिल्पविद्याः विज्ञानादिविद्याश्च आश्रित्य केचित् प्रबन्धा ग्रन्थनमेष्यन्ति ।

(९) महात्मनांअस्मद्देशेषु जातानां प्रथितयशसां चरितानि आख्यानमायास्यन्ति

(१०) इतिहासेभ्यः पुराणेभ्यः धर्म्मशास्त्रेभ्यश्च नीतिमूलकं आख्यानजातं अत्र ऋजुपदविन्यासेन सङ्कलनीयम् ।

(११) ये सन्तः पत्रकेऽस्मिन् प्रबन्धादिकं प्रचारयितुं ईहिष्यन्ते, ते प्रबन्धादिकं विस्पष्टैः सुखपठनार्हैः अक्षरैः पत्राणां एकस्मिन्नेव पृष्ठे (न तु उभयोः पृष्ठयोः) अघनसन्निवेशतया लिपिबद्धं कुर्य्युः । अन्यथा तत् नैव मुद्रयिष्यते ।

(१२) मुद्रणायोग्यानां प्रबन्धानां प्रातिस्वीकारो न भविष्यति । 'पणद्वय'-मितप्रेरणव्यये लब्धे च ते प्रबन्धाः प्रतिप्रेषयिष्यन्ते ।

(१३) 'आङ्गल'भाषायां वङ्गभाषायाञ्च प्रायशः प्रयुक्तं, पदानां वाक्यांशानां वाक्यानाञ्च छेदकं, चिह्नादिकं यथार्हं प्रयोक्तव्यम् ।

(१४) 'यूरोप' भूखण्डजानां प्रत्नतत्त्वविदां भारतवर्षाश्रयाणि गवेषणाकार्य्याणि अत्र उद्घोषमेष्यन्ति ।

(१५) उपकथाः, कथाः संकथाः काश्चित्, आख्यानानि उपाख्यानानि कानिचित्, संवादाः आभाणकाश्च केचन, अन्तरा अन्तरा अत्र सन्निवेशं गमिष्यन्ति ।

(१६) श्रुतिस्मृत्युक्तानि भाषान्तरनिबद्धानि वचनानि उद्धर्त्तव्यानि चेत् तर्हि संस्कृतभाषयैव तेषां सरलं विशुद्धं व्याख्यानं अधस्तात् योजनीयम् ॥

अनुशासकाः पोषकाश्च ।

श्रीश्रीजगद्गुरु श्रीमद् अनन्ताचार्य्यस्वामिजी महाराजः काञ्चीपुरस्थ-प्रतिवादिभयङ्करमठाध्यक्षः ।

आचार्य्यं श्रीश्रीगोस्वामि-गोवर्द्धनलालजिः उदयपुरस्थ-श्रीनाथद्वारस्य महाराजः ।
श्रीयुक्तगदाधररामानुजदासमहान्तमहाराजः श्रीक्षेत्रस्य राजगोपालमठस्य अध्यक्षः ।
,, गोविन्दरामानुजदासः ,, ,, उत्तरपार्श्वमठस्य अध्यक्षः ।
,, परमहंसपरिव्राजकाचार्य्यरामकृष्णानन्दसरस्वतीस्वामी श्रीक्षेत्रस्य शङ्करानन्दमठस्य अध्यक्षः ।
,, रामकृष्णदासगोस्वामी अधिकारी श्रीक्षेत्रस्थ-उत्कलमठस्य अध्यक्षः ।
,, पंडितदामोदररामानुजदासवैयाकरणभूषणः श्रीक्षेत्रस्थ कटकिमठस्य अध्यक्षः ।

अनुशासकाः प्रबन्धकृतश्च ।

महामहोपाध्यायश्रीयुक्तप्रमथनाथतर्कभूषणः ।
,, ,, गुरुचरणतर्कदर्शनतीर्थः ।
,, ,, विन्ध्येश्वरीप्रसाद द्विवेदी ।
,, ,, शिवचन्द्रसार्वभौमः ।
,, ,, अजितनाथन्यायरत्नः ।
,, ,, आद्यनाथन्यायभूषणः ।
,, ,, सदाशिवमिश्रः ।
,, ,, सुब्रह्मण्यशास्त्री ।
,, पण्डितराज यादवेश्वरतर्करत्नः ।
,, श्रीयुक्तचित्रधरमिश्रः ।
,, ,, बांके रायनीवकगोस्वामि विद्यासागरः ।
पण्डित श्रीयुक्त एन्. एस्. अनन्तकृष्णशास्त्री ।
,, ,, कुञ्जविहारि तर्कसिद्धान्तः ।
,, कविराज,, गणनाथसेनः एम० ए०, एल्० एम्० एस् ।
अध्यापक ,, जानकीनाथभट्टाचार्यः एम्० ए०,बि० एल्० पि०आर० एस् ।
,, ,, ब्रजलालचक्रवर्त्ती एम्० ए०, बि० एल्० ।
,, श्रीयुक्त आशुतोषशास्त्री एम्० ए० ।
,, ,, भागवतकुमार शास्त्री एम्० ए० ।
,, ,, रायसाहेब विधुभूषणगोस्वामी एम्० ए० ।
,, ,, पाण्डेयरामावतारशर्मा साहित्याचार्य्यः एम्० ए० ।
कविराज श्रीयुक्त योगेन्द्रचन्द्रसेनविद्याभूषणः वैद्यरत्नः एम्० ए०
,, ,, यामिनीभूषणरायः एम् ए० एम्० बि० ।
,, ,, हेमचन्द्रसेनः कविरत्नः ।

* * * * *

आर्य्यप्रभा संस्कृतभाषामयी मासिकी पत्रिका।

१-अस्याञ्च विविधविषयकप्रबन्धाः, ग्रन्थानां समालोचनेति वृत्यादीनि, टीकाबङ्गानुवादादिभिः सहितान्युपयोगिप्राचीनसंस्कृतपुस्तकानि च प्रकाश्यन्ते। राजनैतिकप्रबन्धादयश्च न प्रकाश्याः।

२-वैशाखात् आर्य्यप्रभाया वर्षारम्भः, यो यस्मिन् मासे ग्राहको भवतु, वर्षस्य प्रथमत एव सर्वैर्ग्राहकैः पत्रिका ग्रहीतव्या। अस्या अग्रिमवार्षिकमूल्यं सप्रेषणव्ययं भारते सिंहले च १॥) सार्द्धैक रूपकं, तदन्येषु च प्रदेशेषु रूपकद्वयम् २), प्रतिखण्डमाणकत्रयम् ≡), यो युगपत् पञ्च खण्डानि क्रिणीयात्, स बिना मूल्यमेकखण्डं लभेत। भिः पिः द्वारा ग्रहणे पुनरधिकमाणकमात्रं -) सर्व्वैरेव प्रदेयम्।

निम्नलिखित पुस्तकानि क्रय्याणि वर्त्तन्ते।

१। पिंगलछन्दः सूत्रम्-मूल्यमेक रुपकम् १) प्रेषणादिव्यय आनकद्वयम् =)

२। भाषा परिच्छेद- ,, ,, ,, ,, ,,

३। मालतीमाधवं नाम प्रकरणम्-मूल्यं सपादैक रुपकम् १।) उत्तरार्द्ध नववर्षीयार्य्यप्रभाया क्रमशः क्रमशः प्रकाश्यते, प्रेषणादिव्यय आणकद्वयम् =)

४। सांख्यसूत्रम्-मूल्यम् रुप्यक द्वयम् २) प्रेषणादिव्ययः आणकत्रयम् ≡)

प्राप्तिस्थानम्-आर्य्यप्रभा सम्पादक-
पो० वेड़ोवेरस् तोरा, जिला मानभूम।

विक्रेयपुस्तकानि।

(१) परशुरामचरितम्	मूल्यम्	अर्द्धरुप्यकम्	एम्, ए, कविभूषणोपाधिना अध्यापकेन श्रीहेमचन्द्ररायेण विरचितम्; प्राप्तिस्थानम्-बंगदेशान्तर्गत 'पाबना'नगरम्॥
(२) हैहयविजयम्	,,	,,	
(३) रुक्मिणीहरणम्	,,	,,	
(४) सुभद्राहरणम्	,,	,,	
(५) सत्यभामापरिग्रहम्	,,	रुप्यैकपादः	
(६) पाण्डवविजयम्	,,	रुप्यैकमात्रम्	

পদক পুরস্কার

বঙ্গীয়-সাহিত্য-পরিষৎ

বঙ্গীয়-সাহিত্য-পরিষদের পঞ্চবিংশ বার্ষিক অধিবেশনে নিম্নলিখিত বিষয়ে উৎকৃষ্ট প্রবন্ধের জন্য নিয়োক্ত পদক ও পুরস্কার প্রদত্ত হইবে।

পদক প্রবন্ধের বিষয়

(১) হরেন্দ্রনারায়ণ আচার্য্য চৌধুরী-সুবর্ণপদক—বঙ্গীয় নাট্য-সাহিত্যে দ্বিজেন্দ্রলালের স্থান।

(২) ঠাকুরদাসদত্ত-সুবর্ণপদক—বঙ্গের পাঁচালী ও সমসাময়িক অন্যান্য সাহিত্যে কবি ঠাকুরদাস দত্তের প্রভাব।

(৩) ব্যোমকেশ মুস্তফী-সুবর্ণপদক—প্রাচীন বাঙ্গলা-সাহিত্যে চণ্ডীমঙ্গল।

(৪) রামগোপাল-রৌপ্যপদক—স্বর্গীয় বরদাচরণ মিত্র মহাশয়ের কাব্য সমালোচনা।

(৫) শশিপদ-রৌপ্যপদক—জাতীয় জীবনে সাহিত্যের প্রভাব।

(৬) ব্যোমকেশ মুস্তফী-রৌপ্যপদক—২৪ পরগণায় ও কলিকাতায় জলযান ও তৎসংক্রান্ত প্রচলিত শব্দ ও তাহার সুনির্দ্দিষ্ট অর্থ ও প্রয়োগ।

পুরস্কার

(৭) রাধেশচন্দ্র-জাতীয় শিক্ষাবৃত্তি (২১৲)—এমার্সনের চিন্তাপ্রণালীর সহিত ভারতবর্ষীয় চিন্তাপ্রণালীর সম্বন্ধ।

(৮) শিশিরকুমার ঘোষ-পুরস্কার (২৫৲)—নরহরি সরকারের জীবন।

বিশেষ দ্রষ্টব্য—প্রবন্ধগুলিতে গবেষণা এবং বিচার-শক্তির পরিচয় থাকা চাই। ৩য় বিষয় পরিষদের সদস্যগণের জন্য এবং ৬ষ্ঠ বিষয় পরিষদের ছাত্রসভ্যগণের জন্য নির্দ্দিষ্ট। অন্যান্য বিষয়ে সর্ব্বসাধারণে প্রবন্ধ লিখিতে পারেন। আগামী ২রা বৈশাখ (১৩২৬) তারিখের পূর্ব্বে প্রবন্ধগুলি পরিষদের সম্পাদকের নিকট নিম্নোক্ত ঠিকানায় পাঠাইতে হইবে।

বঙ্গীয়-সাহিত্য-পরিষৎ মন্দির,
২৪৩।১, অপার সারকুলার রোড, কলিকাতা।

শ্রীরায় যতীন্দ্রনাথ চৌধুরী
সম্পাদক।

संस्कृतभारती-प्रसारपरिषत् ।

वङ्गप्रदेशान्तर्गतवर्धमाननामकनगरे ।

परस्परप्रतिद्वन्द्वितया उत्कर्षप्रकटनाय प्रबन्धविशेषाणां रचनम्। गुणसम्पदा समादृताः प्रबन्धाः "संस्कृतभारती"—नामके अभिनवे त्रैमासिके पत्रके प्रचरिष्यन्ति।

साधारणनियमाः ।

(क) प्रबन्धानां भाषा सरला मधुरा विशुद्धा च भवेत् । प्रबन्धाः विस्पष्टैः सुपठैः वङ्गाक्षरैः नागराक्षरैर्वा (नतु अक्षरान्तरैः) पत्राणाम् एकस्मिन्नेव पृष्ठे अघनसन्निविष्टतया लेखनीयाः ।

(ख) राजकीयायाम् अराजकीयायां वा संस्कृतपरीक्षायायां उत्कर्षदर्शनेन लब्धोपाधिकानां, चतुष्पाठीनाम् अध्यापकानां सोपाधिकानां अनुपाधिकानां वा, उच्च—'आंगल' विद्यालयानां शिक्षयितॄणाम् अधिगतोपाधिकानाम् अनुपाधिकानां वा, विश्वविद्यालयगृहीतायां मध्यपरीक्षायाम् उत्तीर्णानाम्। एतेषां सर्व्वेषामेव प्रबन्धकरणे अधिकारो वर्त्तते ।

(ग) आगामिनः चैत्रमासस्य पञ्चदशदिवसात् प्रभृति मासषट्काभ्यन्तरे प्रबन्धकृतः स्वं स्वं प्रबन्धं वर्द्धमाननगरीस्थ-कर्म्मसम्पादक-श्रीयुक्त-उमाचरणवन्द्योपाध्यायस्य सकाशं प्रेषयेयुः ।

(१) काव्ये ।

(क) रघुवंश-कुमारसम्भव-मेघदूत-किरातार्ज्जुनीय-नैषधचरित-शिशुपालवधानामन्यतममाश्रित्य काव्यविमर्षः—पारितोषिकमूल्यम्—पञ्चदशराजतमुद्राः ।

(ख) ऋतुवर्णनम्—(पद्यात्मकम्) पञ्चविंशत्यवरश्लोकपूरितम्—पारितोषिकमूल्यम्—दशराजतमुद्राः ।

(ग) सरलं अभिनवं उपाख्यानं किंचित्—पारितोषिकमूल्यम्—दशराजतमुद्राः ।

(२) पुराणेतिहासादौ ।

(क) वाल्मीकिचरितं, वशिष्ठचरितं, वेदव्यासचरितम् वा—पारितोषिकमूल्यम् दशराजतमुद्राः ।

(ख) लक्ष्मणचरितम्, अर्ज्जुनचरितं, परीक्षित्चरितम् वा—पारितोषिकमूल्यम् दशराजतमुद्राः ।

(ग) सावित्रीचरितम्, मन्दोदरीचरितम्, सुभद्राचरितम्, मदालसाचरितम् वा—पारितोषिकमूल्यम् अष्टराजतमुद्राः ।

(३) दर्शने ।

(क) द्वैताद्वैतविमर्षः
वा
जीवस्वरूपनिर्णयः
वा
(ग) सांख्योक्तप्रकृतिपुरुषवर्णनम्

१—म पारितोषिकमूल्यम्—पञ्चदश राजतमुद्राः ।
२—य पारितोषिकमूल्यम्—द्वादश राजतमुद्राः ।

‘वर्द्धमान’ नगरे ।
१३२४ । अग्रहायणमासि ।

श्रीउमाचरणबन्द्योपाध्यायः
कर्म्मसम्पादकः ।

श्रीश्रीसरस्वत्यै नमः ।

संस्कृत भारती

भागः २, २य वर्षम्] १३२५ मितवङ्गाब्दस्य ३यांशे [संख्या १

स्तोत्रम् ॥

मातः कृपामयि न किं विपदः सुतानां
जानासि सर्व्वहृदयेष्वपि संस्थिता त्वम् ।
दुःखं निरन्तरमहो यदि भुञ्जते ते
क्षेमङ्करी त्वमिति किं मुनयो ब्रुवन्ति ॥ १ ॥

सुखाय सर्व्वे मनुजा यतन्ते
कायेन वाचा मनसा सदैव ।
परन्तु तेषां न सुखं कदापि
निपीड़ितानां बत दुःखशोकैः ॥ २ ॥

व्रजन्ति मुग्धाः सततं सुखाय
कामादिसन्दर्शितचारुमार्गैः ।
यैरिन्द्रियाणां विषया हि गम्या
आपातरम्याः परिणामभीमाः ॥ ३ ॥

मायामुग्धो भवति मनुजोऽच्छेद्यग्रन्थैः समन्ता-
दाशापाशैर्ग्रथितहृदयैर्दूरतः कृष्यमाणः ।
भूयोभूयः पतति विधुरो विघ्नसङ्घाभिघाता-
त्तत्त्वभ्रष्टो भ्रमति च पुनः सङ्कटाकीर्णभूमौ ॥ ४ ॥

लोके यदत्र सुखदं प्रतिभाति वस्तु
शोकावहं भवति किं न तदेव भूयः ।
दृश्यं नरो यदनुधावति लब्धुकाम-
स्तस्मात् सुदूरमपसर्पति भीत एव ॥ ५ ॥

हाहा भवन्ति मनुजाः परिदह्यमाना
आशानलैरविरतैः परिवर्द्धमानैः ।
त्यक्तुञ्च ते शलभतां न तु शक्नुवन्ति
भुञ्जीत कः कथमहो सुखशीतलत्वम् ॥ ६ ॥

जीवो लोके चरति विषयामोदलुब्धो हि शान्त्यै
भुक्त्वा भुक्त्वा विविधविषयान् नैव तृप्तः कदापि ।
एषा यावद् वसति हृदये कामना दुर्निवारा
तावच्छान्तिं कथमिह जनो लब्धुमीशो धरायाम् ॥ ७ ॥

नैवास्ति किञ्चिदनघं विषयेषु लभ्यं
यत् कामनाविकलिते परिदूयमाने ।
शान्तिं मनुष्यहृदये विनिवृत्तकामा-
मुत्पादयेज्जगति सत्यसुखप्रसूतिम् ॥ ८ ॥

कालदेशपरिमेयवस्तुषु
नैव तृप्तिमुपगच्छति स्पृहा ।
भोगतो न विनिवर्त्तते क्वचि-
दुत्तरोत्तरमियं हि वर्द्धते ॥ ९ ॥

असीमरूपा मनुजस्य कामना
कथं प्रपूर्य्येत ससीमवस्तुना ।
यत् कालदेशातिगवस्तु किञ्चि-
न्मातः कथं तत् विहितं त्वयैव ॥ १० ॥

यदादिमध्यान्तविहीनमच्युतं
सत्यं शिवं शाश्वतमद्वितीयकाम् ।
भयापहं यत् पदमीरितं न किं
तदेव मातः पदपङ्कजं तव ॥ ११ ॥

गुणातिगं सर्व्वगुणावलम्बनं
स्थूलञ्च सूक्ष्मं बहुरूपमेकम् ।
साकारमाकारविहीनतत्त्वम्
व्याप्नोति तद् विश्वमिदं समस्तम् ॥ १२ ॥

इमानि भूतानि ततो भवन्ति
जीवन्ति तस्मिन् बहुधा स्थितानि ।
विलीयमानानि भवन्ति तत्र
ज्ञानं परानन्दमयं तदेव ॥ १३ ॥

तस्मिन् श्रुते हि श्रुतमेव सर्व्वं
दृष्टे च तस्मिन् सकलं सुदृष्टम् ।
वेद्यं न चान्यद्विदिते च तस्मिन्
लब्धे हि लब्धं निखिलार्थजातम् ॥ १४ ॥

तदेव लब्ध्वा परितृप्तिकारणं
सुदुर्निवारा विरमेद्धि कामना ।
तदेव शान्तेः परमं निकेतनं
सुखं नराणां तत एव नान्यथा ॥ १५ ॥

तस्यामृतस्य परमस्य सुखैकहेतो-
र्लाभाय नैव मनुजाः स्वसुखार्थिनोऽपि ।
माया-विमोहितविवेकतया यतन्ते
विद्ये प्रसीद जनयाशु विवेकमम्ब ॥ १६ ॥

मातः शृणोषि हृदितं स्वयमात्मजानां
तेषाञ्च दुःखमखिलं स्वयमेव वेत्सि ।
दुःखान्तकस्तव पदाश्रय एक एव
तत्रापि हेतुरिह ते करुणैव नान्यः ॥ १७ ॥

——

वर्षावतरणिका ।

अहो महिमा निखिलभुवननिदानस्य नित्यस्वमहिमप्रतिष्ठस्य महेश्वरस्य ! यदयं सकलभावविकाररहितोऽपि पदपदार्थादिभावेन विवर्त्तमानोऽखिलजगदात्मतया विचित्ररूपेण नयनपथमासीदति तदेकपरमनसां सेवकानां, मनोमोदमादधाति च प्रकामम् । उक्तं हि शब्दब्रह्मतत्त्वनिष्णातैः,—"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ॥

छात्त्रीयं 'संस्कृतभारती' अपि तदात्मतया तदभिधायकतया च महेश्वररूपिणी जागतजननिकाय हिताय लीलामूर्त्तिमिव भगवतः चिराय नवीननवीनां लीलातनूमास्थाय रक्षन्ती वर्णाश्रमधर्म्मं, चिकित्सन्ती भुवां दानवोपद्रवमिव वाचां मलिमानं, विशदयन्ती चित्तसत्त्वं, अपावृत्य अपवर्गद्वारं स्वात्मस्वरूपतां समानीय निःश्रेयसाय कल्पतेऽवदातचेतसां मनुजधौरेयाणाम् ।

सैवेयमिदानीं परमधिष्ठातुः महेश्वरस्य प्रसादाद् अधिगत्य नवीनां लीलामयीं ललिततनूमिमां तनुविभवैरपि संस्कृतभारतीसेवानिरतैः बुधगणैरुपलालिता महाकालोत्सङ्गसङ्गापि कालकलाकलनया अतीत्य संवत्सरमेकं निहितवती पदं शुभेऽस्मिन् द्वितीये वर्षे । आशास्महे परमपितुः परमेश्वरस्य कृपया, सहृदयानां संस्कृतभारतीप्रणयिनां बुधवराणां स्नेहदृष्ट्या, ग्राहकमहोदयानां प्रेम्णा, विद्योत्साहिनां कमलाकृपाभाजाम् उदारमनसां मनुजमुख्यानाम् अनुग्रहाग्रहीतया अनन्यप्रीत्या, आहितशिक्षायतिः, आकलितकमनीयकान्तिः, समुपचितशक्तिः, आमुक्तविविधभूषा, स्वपोषपुष्टा, परिवर्द्धमाना श्रिया, सहृदयानां प्रियसुहृदां मनसि अमन्दानन्दसन्दोहमुपहरिष्यतीति ।

यदस्ति किञ्चित् स्मरणीयगौरवं भारतीयानां, तद्धि संस्कृतभारतीप्रसादलब्धमेव । प्रथितं हि एतत्, यत् सर्वेषां आर्य्यज्ञानविज्ञानव्यवहाराणां मूलमियमिति सर्वजनीनम् । अतः सर्वैरियं कृपया पोषणीया इत्यत्र नास्ति कापि विप्रतिपत्तिः । अतो विनयेन प्रार्थ्यते,—सकलैरेव विद्योत्साहिभिः संस्कृतभाषानुरागवद्भिः भारतीयप्राचीनसम्प्रदाय उद्दिधीर्षुभिः यतनीयमस्याः प्रचारबाहुल्यं प्रति । यदि हि ते महानुभवा राजानः, महाराजाः अन्येच धनिनः अस्याः कतिचित् संख्या गृहीत्वा राजपुरुषाणां पत्रव्यनुसरणेन स्वाधिकृतेषु विद्यालयेषु संसत्सु, पुस्तकागारेषु, अन्येषु च विद्याधिष्ठानेषु वितरेयुः, तदा कृतार्था भवेदियं सर्वथा ।

गूढपदा गम्भीरभावगहना हि प्राचीना भारती आद्यानां महामनीषासमुज्ज्वलचेतसां महर्षीणां विदुषां च प्रियाऽपि, नाधुनातनानां तरुणचेतसां कोमलतामप्रणयिनां विद्यार्थिनां रतिकरीति सुकुमारपदा मृदुलभावसुखवहा ललितरूपयाभिरामा अभिनवकलेवरेयम् सरसं प्रणयं बिभ्रती प्रणयिनां पुरतोऽवतीर्णा । परिपुष्णन्तु एनां सहृदयाः समादरेण । ततश्च अखिलमानवहृदयकन्दरविराजमाना आनन्दद्रवेण स्नपयतु धरित्रीम् ।

प्रायेण इदानीन्तना युवानः सन्मार्गदृष्टिविरहिताः तमिस्रास्विव दीपहीनाः

परिहाय सन्मार्गं कुर्वन्ति अपथे पदं, दर्शयतु इयं सत्पथगतिं शास्त्रदीपावरणोद्घाटनेन ।

बाहुल्येन जनाः स्वतः प्रमादतो वा इदानीं परस्परविद्वेषिणः अवगाहन्ते विरुद्धं मार्गं, निन्दन्ति च परस्परम् । सन्तमपि स्वकीयमाचारम्, विशुद्धमपि व्यवहारं, शोभनामपि नीतिं, समुत्कृष्टमपि धर्म्मं द्विषन्ति अपरे । इयन्तु विहाय सर्वं विरोधं समं सेविष्यते सर्वम्, उपदेक्ष्यति च विरोधपरिहाराय ।

इयं हि जगतामत्युपप्लवकरे प्रबलबलविभवानां पश्चिमाशानायकानां भूनभोभूधरसागराभोगेषु अप्रतिहतरयैरन्योन्यसंगरविमर्द्दैरतिसङ्कुले उत्कटत्रासजडिमजिह्मितप्रकृतिपुञ्जके धनजीवनवियोगोद्विग्नभुवनजने विरहितान्यकृत्यसमुत्साहे दुरासदजीवनोपायविषमे कष्टे काले आविर्भूय प्रतिक्षणं गणयन्ती आत्मनः अचिरविलयं कथं कथमपि भारतीयशासनाधिष्ठितानां विद्यासु सहजानल्पकृपोत्साहवतां राजपुरुषाणाम् आशातीतं साहायकं लब्ध्वा प्रचारमासाद्य सम्पुष्टावयवा यथास्वं प्रकाशमाप्तवतीति महान् प्रमोदः सहृदयानाम् । वयं च एतेषां महानुभवानाम् ईदृशेन महतानुग्रहेण धन्यधन्याः कृतज्ञताभरेण आवर्ज्जितदेहाः मुहुमुहुर्घोषयामः तेषां प्रशस्तिमण्डितां साधुवादपरम्पराम् ।

संस्कृतभारतीयं भारतीयानाम् आर्य्यवर्य्याणां धर्म्मे आचारे व्यवहारेषु च आ जन्मनः आच परमादुच्छ्वासाद् ऐहिकेषु पारलौकिकेषु च सर्वेषु दैनन्दिनकर्म्मसु प्रधानमालम्बनम् । परिहाय चेमां नोच्छ्वसितुमपि अलं स्वधर्म्मनिष्ठाः सन्तः । अतोऽस्याः जीवनं, पोषणं, भूषणं च आयतते प्रधानतः तेष्वेव । परन्तु महदिदं कष्टं, यदेते भारतीया कमलाकृपाभाजनतया सुप्रथिताः महात्मानः महता आयासेन व्ययेन च सततं विविधेषु विलासव्यसनेषु सज्जन्ते नाम, नत्वेषां कृपाकणिकामपि प्रायेण आक्रष्टुमलमियम् अनन्यशरणा वराकी सर्वतोभावेन संसेवमानाऽपि । अहो महदिदं कालवैभवं, यदियं नामतो विशती अपि एषां श्रुतिविवरं कटुकीटदशनज्वालामुत्पादयति, कायतो नयनपथवर्त्तिनी प्रबलां चक्षुःशूलतामापद्यते, नचैते खिद्यन्ति एतस्याः समुन्नतौ, परम् उन्मत्ततां मन्यन्ते एतत्पोषकाणाम् । अहो महतीयं कृतज्ञता अस्याम् आर्य्यसमाजधुर्य्याणाम् ।

अस्मदीयानि खलु संस्कृतविद्याधिष्ठानानि प्रायेण निःस्वैरेव अध्यापकवर्य्यैः परिचालितानि भवन्ति, ते हि अर्थव्ययेन पुस्तकादि संग्रहीतुं नार्हन्ति, अतः भारते, नेपालराज्ये, श्यामदेशे च अस्माभिः सहस्रसंख्याया अस्याः वितरणम्

अभिप्रेम: । उच्चविद्यालयेषु, चतुष्पाठीषु, साधारणसमितौ, पुस्तकागारादिषु च तथैव अस्या: आङ्गलपरिशिष्टस्य सहस्रसंख्या: वितरितुमीहामहे ।

अत: ये खलु राजान: महाराजा: अन्ये च अर्थवन्त: तान् विनयेन अभ्यर्थयामहे यदेतेषां साहायकमन्तरा अस्माकमभिप्राय: न कथमपि कार्य्येत: सेत्स्यति, तदेते महात्मान: ददतु कृपादृष्टिमत्र । ते हि गृह्णन्तो बाहुल्येन अस्या: काश्चित् संख्या: स्वाश्रितेषु विद्याधिष्ठानेषु वितरन्तु ।

ये च वाणीवरणसेवानिरता बुधजना: तेषु च प्रार्थना, सहृदया कृपया ते प्रबन्धरत्ननिचयै: भूषयन्तु एनाम् इति शम् ।

वङ्गीयविप्रकुलतिलकस्य 'स्यार' इत्युपाधिविभूषितस्य मनीषिवर्यस्य गुरुदासवन्द्योपाध्यायमहोदयस्य लोकान्तरप्राप्तौ ।

(१)

शोकोच्छ्वास: ।

(१)

हा हाभूद्दुष्प्रभाता रजनिरियमहो दारुणो दारुणो यत्
वृत्तान्त: प्रातरेव श्रुतिपथपतितो मर्म्मविश्लेषकारी ।
भूदेव: श्रीगिरीशश्च प्रिय इतिगुरुदासाभिधो विश्रुतोऽसौ
वन्द्योपाध्याय एतां क्षितिमतिविधुरां संविधाय प्रतस्थे ॥

(२)

हा हा क्रूर: कृतान्त: प्रबलतमतमोभारताकाशभानुं
पुण्यश्लोकं तमीड्यं कवलितमकरोद्दुर्व्विपाकाद्विधेर्व: ।
कथा सर्व्वा धरा तत्सुनिविड़तमसा शून्यशून्येव भाति
च्छिन्नो वृन्ते धरण्यामिव लुठिततनुर्बन्धुता रोदितीह ॥

(३)

यैरासी: श्लाघमाना वसुमति वसुभि: प्रोज्ज्वलं तेषु मात:
हृत्वैकैकं दुरात्मा न विरमति विधिर्भूय उत्सङ्गसङ्गम् ।
हन्ताद्यानन्तकीर्त्तिं हरति सुतमर्यां दीर्य्यसे नो तथापि
का वा सोढुं समर्था जगति नु कठिने त्वामृते रत्नमोषम् ॥

(४)

बन्द्योपाध्यायवंशामलसलिलनिधेर्जात एकोऽद्वितीयः
पूर्णेन्दुर्निष्कलङ्कः सततसमुदितः सर्व्वसन्तापहन्ता ।
यस्य स्निग्धं सुमेध्यं सुचरितकिरणं सादरं सन्निपीय
धीरश्रेणीचकोरो भवति हि नितरां निर्भरानन्दपूर्णः ॥

(५)

मातुः खेदेन बाल्यं समयमपनयन् दुःखदुःखेन दीन-
स्तस्या एव प्रयत्नात् पठननयविधौ पारदर्शित्वमाप्य ।
भक्त्या प्रत्यक्षदेवीं सततमनुगतः पूजयंस्तां चिराय
यो जातः ख्यातनाम्नां धनजनविभवैरग्रणीर्व्विद्यया च ।

(६)

यौवत्यं राजभावास्त्वधिकमपि गतः पित्रनुष्ठेयधर्म्मात्
ब्राह्मण्याद्धर्म्मवीरो न विचलति कदाप्यल्पमात्रं परं यः ।
निर्व्वैरं सत्यशौचप्रमुखगुणचयो यत्र नित्यं न्युवास
हा हा तस्य प्रणाशात् किमिव हि जगतो नाशितं नो विधात्रा ॥

(७)

यस्य स्वाभाविकी वाङ्निखिलनयपरा धर्म्म्यरम्योपदेशा
कर्णे पीयूषधारामनधिगतवताञ्चापि सम्वर्षति स्म ।
शान्तैराकारभावैः प्रवयसि युवके बालके चान्त्यजे च
यस्यासीत्तुल्यभावः स बत भवनिभो ध्यानगम्योऽद्य जातः ॥

(८)

ज्ञानं गर्व्वेण हीनं शशिकरविमलं त्यागिता निर्व्विकारा
यस्यासीत् सर्व्वभूतेष्वकपटकरुणा सूनृता भारती च ।
आर्य्यो धर्म्मः शरीरं श्रित इव कलिजान् मानवान् शिक्षयित्वा
हन्ताविर्भूय भूयः स किल निजपुरं प्राप्तकालो जगाम ॥

(९)

राज्ञो धर्म्माधिकारे निरतिशयवरे विश्वविद्यालये च
वैचक्षण्यं क्रियायामधिकतरमहो दर्शयित्वा जगत्याम् ।

सत्कीर्त्तिं वैजयन्तीं धवलितककुभं स्थापयित्वा चिरस्थां
सप्तत्यूर्द्ध्वं वयो योऽमर इव विहरन् लोकमेतं जहौ सः ॥

(१०)

संप्रार्थ्यं गुरुदास हे तव कृते पारत्रिकं चैहिकं
श्रेयः किञ्चन नास्ति तद् यदिव वा नावाप्तवान् नाप्स्यसि ।
यत्ते विश्वजनीनकर्म्मसकलं भोगापवर्गप्रदं
नित्यं त्वामनुयाति कर्म्मनिरतं छायेव यत्रासि भोः ॥

(११)

गुणधर गुणराजीमोहितेयं तथापि
तव परशुभकामा प्राञ्जलिः साश्रुनेत्रा ।
परिषदनघभक्तिप्रीतिगन्धाम्बुपूतं
वितरति गुरुदास श्लोकपुष्पाञ्जलिं ते ॥ इतिशिवम्

---

(२)

हृदयावेगः ।

(१)

दाने कल्पतरुर्गुणे सुरगुरुर्नीतौ सदा भार्गवो
माने देवपतिर्धने धनपतिर्धर्म्मे महर्षिर्मनुः ।
आर्य्यावर्त्तनभस्तमोविलयकृद् वन्द्यान्वयालंकृति-
रासीद्यो गुरुदासचन्द्र इह स ग्रस्तोऽधुना राहुणा ॥

(२)

विख्यातो नीतिशास्त्रे सुकठिनविषये राजदत्तोपनामा
"डक्टारा" ख्यः प्रवीणो विविधगुणनिधी राजभाषासुदक्षः ।
"भाइस्चेन्स्लरी" यो बुधगणविदिते विश्वविद्यालयेऽस्मिन्
आसीद् यः साधुगोष्ठ्यां सुकविगुणयुतो बहुसौभाग्यभूमिः ॥

(३)

विबुधगणशरण्यो वैदिकाचारनिष्ठो, गुरुचरणनितान्ताराधनासक्तचित्तः
भुवनविदितकीर्त्तिर्मातृभक्तो वरेण्यो विपुलविभवमध्ये राजयोगी य आसीत् ॥

(४)

विचारकार्य्याय परत्र धर्म्मराजोऽस्ति संचिन्त्य विधानवत्तः ।
भूलोकलोकस्य विचारहेतौ विचारकं यं व्यसृजद् विधाता ॥

(५)

तच्छोकसिन्धौ सविशेषमग्नान् तत् पुत्त्रदारान् स्वजनैः समेतान् ।
शान्तिप्रदानैः परिपालय त्वम् हे कृष्ण ! सन्तापतमोऽपहन्तः ॥

पद्यम् ।

नीतिः ।

बलबुद्धिधनजनयौवनानीति पञ्च मनुष्याणां प्रधानसम्पद इत्येषां पञ्चानां वस्तूनां कार्य्यतत्त्वनिर्णय आवश्यक इति तदेव निर्णीयते । एवं संस्कृतशास्त्रानुशीलनपराणां तद्भाषाव्युत्पत्तिविवृद्धये च क्रियाबोधकानाम् अभावबोधकानाञ्च यावतामेव शब्दानां व्यवहारोऽप्येकत्र प्रदर्श्यत एतच्छ्लोकेन । श्लोकोक्तक्रमेण क्रियाबोधकाः शब्दाः—कार्य्य-क्रिया-कृति-कर्म्म-कृत्याकृत्यास्पदानीति सप्त । अभावबोधकाश्च निपाताः—नहि अननापि नो इति पञ्च ।

शक्तेःकार्य्यन्तु रक्षेति । अत्र तुकारः एवकारार्थकः (अवधारणार्थकः) । तथाचोक्तं "तु स्याद् भेदेऽवधारणे इति । तथाच 'शक्तेः कार्य्यमेव किम्' इतिप्रश्ने उत्तरम्-रक्षेति । अथवा रक्षेत्यस्यानन्तरं तस्यान्वयः । तथाच शक्तेः बलस्य सामर्थ्यस्य कार्य्यं रक्षैव विपन्नप्राणिनां रक्षणमेव । नहि परदलनं, न सामर्थ्यशालिसिंहव्याघ्रप्रभृतिवन्यपशुवत् परपीड़नम्' शक्तिकार्य्यमित्यर्थः । एवमन्यत्र । तथाच सामर्थ्यशालिभिः पुरुषैः जीवानां विपत्काले रक्षणमेव कर्त्तव्यम् । दुर्बलानां देहिनां न परिपीड़नं कार्य्यमित्युपदेशः, एवं परत्रापि । श्लोकस्येन "शक्तेःकार्य्यन्तु रक्षा नहि परदलनमित्यंशत्रुटिकेन क्रियाबोधककार्य्यशब्दस्य निषेधार्थकनहीतिनिपातस्यच प्रयोगो दर्शितः इति । अथ बलकार्य्यनिरूपणानन्तरं बुद्धिकार्य्यं निर्णीयते-सौम्यबुद्धेः क्रियाऽपि, सच्चिन्तैवेत्यशाठ्यमिति । सौम्येति श्रोतृसम्बोधनं, बुद्धेर्विशेषणं वा । हे प्रशान्तमूर्त्ते बुद्धेःक्रियाऽपि सच्चिन्तैवेति, सच्चिन्ता सती चिन्ता सतां चिन्ता वा । सती चिन्ताच ईश्वरचिन्ता ईश्वरकार्य्यादिचिन्ता आत्मचिन्ता आत्मकार्य्यचिन्ता परलोकचिन्ताचेत्याद्या । सतां चिन्ता नाम सत्पुरुषाणां सद्विषयाणां (जीवहितकराणां) शास्त्रीयविषयाणाञ्च चिन्ता । चिन्तैवेत्येवकारेण तेषां विषयाणां चिन्तैव

स्रग्धराछन्दः ।

शक्तिः कार्य्यन्तु रक्षा नहि परदलनं सौम्यबुद्धेः क्रियाऽपि,
चिन्तेवेत्यशाठ्यं धनकृतिरखिलाप्यायनं नापकर्म्म ।
कृत्या स्वीया सुकृत्येष्विह सहचरता नापि हिंसा कथञ्चित्,
एवं सद्यौवनस्यास्पदमतिकृतितासाधनं नो कुवृत्तिः ॥ इति शिवम् ।

कर्त्तव्या, चिन्तया तत्तदुक्तेः समाधानमेव कर्त्तव्यम् । नहि अभिमानवशात् तदुक्तिखण्डने प्रयासः कारणीयः इत्यर्थः प्रकाशितः । परिहृतस्वबुद्ध्यभिमानैः एतदवश्यमेव बोद्धव्यं-यत् तैरलौकिक-बुद्धिसम्पन्नैः, मदपेक्षया बहुबुद्धिशालिभिरपि नमस्कृतैः, परमयोगिभिः महापुरुषैर्यदुक्तं तच्च कथ-ञ्चिदपि अनृतं भवितुमर्हतीति । अशाठ्यमित्यत्र अ इत्यव्ययं निषेधार्थकं, तथाचोक्तं, "अभावे नहानोनापी"ति । तथाच बुद्धिकार्य्यं काकशृगालादीनामिव शाठ्यं शठता चातुर्य्यं परवञ्चनात्मकं नेत्यर्थः । एतदंशेन क्रियाप्रकाशक-क्रियाशब्दस्य, एवं निषेधावगमकस्य "अ" शब्दस्य व्यवहारो दर्शितः । ततो धनकर्म्म निरूप्यते धनकृतिरित्यादिना नापकर्म्मेत्यन्तेन । अखिलानां समस्तशरीरिणां आप्यायनं, अर्थात् येन कार्य्येण सर्व्व एव जन्तवः आप्यायिताः प्रीताःसुमनसो भवन्ति, तादृशकार्य्य-मेव । ब्रह्मयज्ञ-देवयज्ञ-पितृयज्ञ-भूतयज्ञ-नृयज्ञादिकमितिभावः । नापकर्म्म, अपकार्य्यं कुत्सितकार्य्यं अशिक्षितानां नीचजातीयानामिव दीनजनावज्ञाधनाभिमानपरदुःखजनककार्य्यादिकं नेत्यर्थः । एतस्मिन्नंशे तयोर्बोधकौ "कृति"शब्द-"न"शब्दौ व्यवहृतौ ।

अथ जनकार्य्यमवधार्य्यते कृत्येत्यादितृतीयपादेन । अत्र स्वशब्दः जनबोधकः (आत्मी-यार्थकः) यथोक्तममरसिंहेन "स्वो ज्ञाता वात्मनि स्वं, त्रिष्वात्मीये, स्वोऽस्त्रियां धने" इति । तथाच स्वीया जनसम्बन्धिनी, कृत्या क्रिया, सुकृत्येषु सत्कार्य्येषु सहायशून्यतया अनिर्व्वाह्यमानेषु निःसहायजनारब्धेषु यागयज्ञादिषु, अन्यविधेषु वा परासुखासम्पादकेषु सत्सु परसुखजनकेषु समुत्कृष्टवस्तुनिर्म्माणसंग्रहप्रदर्शनादिषु सहचरता साहचर्य्यं साहाय्यमेव । एकत्र सुमिलितानां समभावापन्नानां सारमेयाणा (कुक्कुराणां) मिव कथञ्चित् केनापि प्रकारेण हिंसामारणताड़न-भीतिप्रदर्शनादिरूपा नेत्यर्थः । अस्मिन् भागे क्रियाप्रत्यायकौ कृत्याकृत्यशब्दौ, निषेधबोधकञ्च नापीति शब्दः प्रयुक्तः ।

अवशेषे यौवनकृत्यं सुस्थिरीक्रियते एवमित्यादिना श्लोकान्तेन । यथा बलबुद्ध्यादीनां कार्य्यं प्रदर्शितं, तथा यौवनस्य आस्पदं कृत्यमपि "प्रतिष्ठा कृत्यमास्पदम्" इत्युक्तेः, अतिकृति-त्वसाधनमेव । अन्यैरसाध्यं यद्यत्कार्य्यं, दुरवगमार्षशास्त्रसमूहप्रकृतार्थनिर्णयसमद्भूतवस्तुनिर्म्मा-णप्रकाशनादिवलवत्-परिपीड़ितजनगणपरित्राणादिरूपं तदेव । नो कुवृत्तिः भैरवभैरवपदकु-क्कुटलम्पटादीनामिव केवलमिन्द्रियचरितार्थतादिकमेव नेत्यर्थः । एतस्मिन्नंशे च क्रियानिषेधयो-र्बोधकौ आस्पद-शब्द-नो-शब्दौ व्यवहृताविति संक्षेपः ।

क्रमशः—

पद्यम् ।

(किं कर्म्म कार्य्यं) नीतिः ।

(स्रग्धरा) मूलमात्रम् ।

(१) शक्तेः कार्य्ये हि रक्षा नहि परदलनं
(२) सौम्यबुद्धेः क्रियापि सच्चिन्तैवेत्यशाठ्यं
(३) धनक्षतिरखिलाप्यायनं नापकर्म्मं ।
(४) क्षान्त्या स्वीया—सुक्षान्त्येऽप्विह सहचरता, नापि हिंसा कथञ्चित् ।
(५) एवं सद्वयोवनस्यास्पदमतिक्षतितासाधनं नो कुर्य्यात्तिरिति शिवम् ।

(२)

(किं कुत उत्पद्यते)

(शार्दूलविक्रीडितम्)

(१) सर्वे[१२]र्हार्द्द[१०]महिंसया (२) शठतया विश्वासनाशो (३) । भिया
बुद्धिभ्रंश (४) च्युतप्रियेण वचसा श्रद्धेयता स्याद्द विशाम् ।
(५) स्याच्चिर्भीरपरिग्रहेण (६) कथया सुश्लाघ्यया तुष्टिकृत् ।
(७) चापल्येन च बालता-परिचयः स्यात् तेन चोपेत्यते ॥

(३)

(कुतः कस्य विवृद्धिः)

(शार्दूलविक्रीडितम्)

(१) विद्या[१] नित्यसुचिन्तया[११] (२) स्वयमनुष्ठानेन कार्य्येषु धीः ।
(३) भक्तिस्फूर्त्यै[२]द्गत्यै[२]सङ्गशयनव्यायामजालै[१]र्बलम् ।
(४) सौन्द[१]र्य्यं परिशुद्धिशुद्धवसनालङ्कारवेशाशनैः ।
(५) वर्द्धन्तेऽ[२]ध्ययना[२]सदुत्थ[२]रतिसत्सङ्गैः समे सद्[१]गुणाः ॥

---

(१) तथाच शक्तिमन्तो जनाः विपन्नजनान् सर्वथा रक्षेयुरेव, न कथञ्चन कांश्चिदपि परिपीड़येयुरित्युपदेशः । एवं परत्रापि ।

(१२) विशां मनुष्याणां "द्वौ विशौ वैश्यमनुजा" वित्यमरः । एतेनेदमुपदिष्टं भवति । सर्वं प्रियतामिच्छन्तो लोकाः केनापि प्रकारेण कस्यचिदपि हिंसां न कुर्य्युरिति । एवमन्यत्र ।

(१) अनेनेदमुपदिश्यते, विद्यां वर्द्धयितुमभिलाषुकाः परिहृत-तच्चिन्ताव्याघातकाः सन्तः तामेव नित्यं चिन्तयेयुरिति ।

(४)

(कस्य वस्तुनः कुतो नाशः)

(शार्दूलविक्रीडितच्छन्दः)

(१) नश्यत्यस्त्[1]मममवियोग[10]– (२) मशुभं [1]सर्वं हरेराख्यया ।
(३) सम्पद्राशि[1]रवीक्षितः–(४) पुरुषशा विद्यापि चोपेक्षया ।
(५) सुप्रज्ञाऽपि कुचिन्तया नियतया–(६) निर्व्याधता[1] शिक्षया ।
(७) मानो[1]भिक्षुतया–(८) ह्रिया मिजकृतिः[1] सर्वं गुणा[1]व्याख्यया ॥

क्रमशः–

ग्रीष्मवर्णनम् ।

ज्वलदग्निरथासीनः कोऽयं दीप्ततनुर्महान् ।
तप्तकाञ्चनसङ्काशो धावत्याकाशवर्त्मना ॥
रथरश्मिषु संबद्धा वाजिनो रक्तकेसराः ।
उद्गमन्तीव ते वह्निं भीमवह्निसहोदराः ॥
भीष्ममूर्त्तिरयं ग्रीष्मो येन गच्छति वर्त्मना ।
तत्र पङ्कजहास्यं हा लुप्तं वीणामिवाञ्जसा ॥
दीर्णा शीर्णा च वसुधा शतधा परिदृश्यते ।
तां नु किं विशति ग्रीष्मो जलं पङ्कञ्च सारसम् ?
हन्ताद्य भास्करात्तीव्रः सोढुं नार्हति पद्मिनी ।
पतिमुग्रमतिं वीक्ष्य बाला भार्येव वेपते ॥
ग्रीष्माशनिहताः सन्तो नता हीनप्रभा अमी ।
निष्पर्णास्तरवो भान्ति विवस्त्रा दानवा इव ॥
द्रुमेषु विहगालापः श्रूयते न मनागपि ।
प्रकृतिर्दृश्यते दग्धा मलिनेव समन्ततः ॥

---

(१०) तथाच इन्द्रियनिचयस्वास्थ्यकामाः सावधानाः सन्तस्तानि स्वस्वविषयेषु समेनैव नियोजयेयुरित्युपदेशः । एवं सर्वत्र ।

पिपासाक्षामकण्ठोऽसौ चातकः क्षीणविग्रहः ।
"स्फाटिकोदक"लाभाय जलदं याचते भृशम् ॥
वासन्ती सुषमा हन्त मञ्जुकुञ्जेषु या श्रिता ।
साऽद्य कालवशात् प्रौढ़ा रञ्जयति न कोविदान् ॥
नदी-नद-ह्रदाः-खाताः वापी-कासार-पल्वलाः ।
तड़ागदीर्घिका अद्य सद्य एव हतश्रियः ॥
प्रतप्तप्रस्तरोपेतशैलगह्वनमाश्रयन् ।
क्रान्तः श्रान्तोऽपि मृगेन्द्रो मृगयार्थं न चेष्टते ॥
निदाघतापसन्तप्तो हतोत्साहः शिखावलः ।
नर्त्तनाद्विरतः केकावाणीविरहितो यतिः ॥
आशीविषाच्च गृह्णाति स्वबर्हाधोगतानपि ।
फणिनोऽपि फणासंस्थान् मण्डूकान् नाक्रमन्ति ये ॥
दिवाकरकरैः पृक्तोऽनलकल्पोऽनिलोमहान् ।
पीड़यन् वसुधागात्रं रुद्रं रौद्रे प्रधावति ॥
याऽसीत् वनस्थली कान्ता वसन्ते शान्तिदायिनी ।
परभृत्काकलीपूर्णा पुष्पपल्लवमण्डिता ॥
निर्झरैः परितो व्याप्तैः सुनीरैः परिशोभिता ।
सेयं विधिवशाज्जाता मरुभूरिव सर्वतः ॥
सरित्सु सलिलं स्वल्पं तदप्यस्पृश्यमुष्णकम् ।
झषा नक्राश्च शतशो म्रियन्ते ग्रीष्मतापिताः ॥
विधूय व्यजनं बाला बलहीना हि सम्प्रति ।
मृणालकोमलाद्बाहोः भ्रंशते तालवृन्तकम् ॥
गण्डस्थलीष्वद्य वधूजनानां न राजते सा वरपाटलश्रीः ।
स्तनेषु तासां श्रितचन्दनेषु मृतेव सा कोमलता हतेव ॥
शिशिर-सुरभिवर्षा यस्य लीलाप्रकर्षाद्
मनुजमनसि कामं वर्द्धयन्तीह हर्षम् ।
मिहिरशशधरौ तौ यस्य नेत्रे विशाले
वितरतु स हि मोदं मन्दहा द्वन्द्वहा च ॥

विवृतिर्ब्राह्मणसमाजस्य ।

दिने दिन एवेदानीं ब्राह्मणपण्डितानां यादृग्विलोपः परिदृश्यते तेन भविष्यति काले वङ्गेषु आर्य्यसमूहस्यास्तित्वं सुचिरं स्थास्यति वा नवेति शङ्का निरन्तरमेव समुदेति नोमनःसु । यत्र किल वङ्गभूमौ पुरा नासीत्तादृग् जनपदो यो नास्पदं पण्डितानां; यत्र वा संख्याविरहिता अन्तेवासिनो नाध्यगीषत वेद-वेदाङ्ग-स्मृति-न्याय-पुराणादीनि शास्त्राणि । नासीच्च तदा तादृशो द्विजन्मा आजन्मतो नाधीतं येन शास्त्रम् । हा हन्त ! दैवस्य दुर्विलसितेन तस्यामेव वङ्गभूमाविदानीं क्वचिज्जनपदे कतिचिदेव जनाः संस्कृतभाषामधीयाना दृश्यन्ते । यद्वङ्गभूमावेकदा भूयिष्ठपण्डितमण्डलीनां प्रकटपाण्डित्यवार्त्तया विमण्डितमिवाभवद् दिगवध्या अन्तरालं, ब्राह्मणपण्डिता एव यद् वङ्गभुवोऽङ्गमण्डनानि प्रधानतमान्यासन्, यद्दे-शस्यास्य आर्य्यवर्य्याणां कार्य्ये भावगाम्भीर्यञ्च पर्य्यालोचयन्तः असामान्यं प्रावी-ण्यञ्च बहु मन्यमानाः न केवलमस्मद्देशीया भारतीयाः अपि तु विधर्म्माणोऽपि वैदेशिका विपश्चितो विस्मयनीरनिधौ निमज्जिता अभवन्, अधुना सैव वङ्गभूः कालप्रभावादपगतपण्डितविभवा क्षीणप्रतिभेव प्रतिभाति । वङ्गदेशस्य गौरव-स्थानं नवद्वीप-विक्रमपुरादयः प्रदेशाः वेदादिध्वनिविरहिता हृतश्रियो मूका इव नीरवा विराजन्ते ।

यत्र हि नवद्वीप विक्रमपुरादौ नानादिग्देशागतान् विद्यार्थिनो भिक्षाल-ब्धेनापि धनेन पोषयन्तो निर्बाधमध्यापयामासुरध्यापकाः, यस्माच्च अध्ययनस्थान-मलभमाना शङ्काचा; कदाचिदपि न प्रत्यावर्त्तिष्यन्त, यत्र च सन्ततं सुमधुरैः श्रुति-मधुरैश्च सामगानादिभिराकृष्यमाणा "संस्कृतसरस्वती" चिरायैव वसतिमकल्प-यत्, अहो बत, तत्रैवाधुना स्थानाभावात् संस्कृतपाठार्थिनः इतस्ततो भग्नमनोरथा वृथैव सञ्चरन्ति । एवम्विधायामपि देशस्यावस्थायाम् अधुनाऽपि ये सन्ति सन्तः कतिचिन्महान्तः, तेषां पुनरभावेन देशस्यास्य कीदृशी दशा सम्भवेत् तां विधातैव वेत्ति सर्व्वान्तर्य्यामी ।

किमत्र कारणं, केनाधुना पण्डितान् प्रति विशुद्धचेतसामपि विदग्धानां नास्ति तादृशी श्रद्धा, कथं वा पण्डितसमाजस्य वर्त्तमानावस्था प्रतिदिनं शोच-नीयतरैवानुमीयते तदेवात्र संक्षेपतो विव्रियते ।

पुरा खलु ब्राह्मणाः* षट्कर्म्मशालिनो तपःप्रभावसम्पन्नाः स्वधर्म्मपराय-

* षट्कर्म्माणि—यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहाः ।

याश्च आसन् । तादृशानां सर्ववर्णसेवितानां ब्राह्मणपण्डितानामनुकम्पालाभाय सर्वेषामेवाग्रहातिशयोऽवर्त्तत । तेषामशेषशास्त्रानुशीलनतत्पराणां प्रतिपालनधिया अनेक एवास्मद्देशीया धनिनो निर्धना अपि तान् दशकर्म्मादौ निमन्त्र्य श्रुतिस्मृति-कथाश्च तेभ्यः समाकर्ण्य धर्म्मतत्त्वमपि सम्यग् अधिगम्य परां तृप्तिं भेजुः, आत्मा-नमपि कृतार्थमिवामन्यन्त । इदानीन्तु तन्निमन्त्रणमपि यन्त्रणादायकमिति मत्वा प्रायेण परिहरन्ति धनवन्तः, दरिद्रा पुनः दूरत एव तिष्ठन्ति । मध्यवित्ता हि शिक्षिता राजकार्य्याद्यनुरोधेन प्रायशः विदेशमेवाधिवसन्ति सबान्धवाः । तत्रैव भ्रातृभगिनीपुत्रकन्यानां विवाहादिकार्य्यजातमार्य्यजनोचितं कथं कथमपि सम्पाद्य स्वदेशीयानां दुःस्थानां ब्राह्मणपण्डितानामनुकूलताविधौ मनो न निवेशयन्ति । विना तु साधारणजनगणसहानुभूतिम्, ऋते चार्थवतामर्थसाहाय्यं किं खल्ववलम्बनमालम्ब्य निरालम्बाः पण्डिताः पूर्ववदध्यापनां सम्पादयेयुः ?

एतावतीष्वपि प्रतिकूलावस्थासु ते तावद् धर्म्मप्राणा ब्राह्मणा यथासाध्य मध्ययनाध्यापनाद्यध्यवसायमादर्शयितुमद्यापि नो निश्चेष्टास्तिष्ठन्ति, स्वीयपुत्र-पौत्रकलत्रदौहित्रादीनां सुखस्वाच्छन्द्यमनभिनन्द्यापि ते कृच्छ्रार्ज्जितेनार्थेन विदेशागतान् विद्यार्थिनः संपोष्याकुण्ठं वितरन्ति विविधा विद्याः । नव्यविलास-लालसावशीकृतचेतस इव पाश्चात्यशिक्षाभिमानिनः आत्मसुखाभिलाषिण इव ते न सर्वदा स्त्रीणां स्त्रीबन्धूनाञ्च वसनाशनभूषणासादनाय वस्तुत एव समाकुलचित्ताः । कथञ्चिदप्युदरपूर्त्तिपरिमिताच-संस्थान-व्यवस्थां कुर्वन्तः समुपस्थितशिक्षा-र्थिसंस्थापनसमर्थतायामेव ते कृतार्थानात्मनो मन्यन्ते । केचित् पुनः महानुभवाः छात्रान् पुत्रानिव पालयित्वा आर्य्यगौरवमनुसरन्तः कुलपतित्वमिव नः स्मारयन्ति । तथाचोक्तं

मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः ॥

अहो ! अचिरेणैव तादृशानां महापुरुषाणां संख्याह्रासो भविष्यति इत्यतः प्रकृत्यैव चित्तमुद्विजते । देशहिताकाङ्क्षिणो मनस्विनः सनिर्बन्धमनुसध्यन्ते यदधुनापि तैर्नोदासितव्यम् । पाश्चात्यविद्याविद्योतितमतीनान्तु चेतसि न कदाप्यार्य्यगौरवचिन्तासमुदेतीति तर्कयामः । ते तु प्रायेण एवेदानीं स्थूलवहिर्विषयभोगैकपरत्वात्, 'नेत्रत्राण'–(spectacles)–धारणाच्च 'सूक्ष्मतत्त्वदर्शन'-विमुखाः समुपलभ्यन्ते । प्रचलितशिक्षापद्धतिमनुसरतां केषामपीदानीं नाऽनुभूयते मनस्विता ।

दास्यमेव मुख्यमुद्देश्यं वर्त्तमानशिक्षायाः । विद्या त्वधुना न हितकरी, अपि त्वर्थकरी । नव्यशिक्षितानामनेकेषां प्रभूतं धनमुपार्ज्जयतां चेतसि मनुष्यत्वविकाशस्तु कदापि नानुमीयते, परं विलासक्रीतदासता तेषु सम्यगेवानुभूयते । परलोकवासिनो मधु-नवीन-हेम-वङ्किमादयस्तथा जीविता जगदीश-प्रफुल्लसुरेन्द्राशुतोष-गुरुदासादयश्च यद्यपि पाश्चात्यशिक्षायामत्यन्तमुत्कर्षतामदर्शयन् तथापि वयमत्र सङ्कोचविरहिता एव उदीरयामो यद् आधुनिकी शिक्षापद्धतिरस्मद्देशीयान् गमयिष्यति तूर्णमेव बुद्धि-वृत्तिपरिहीनताम् । भवन्तु ते नाम पुण्यश्लोकाः पाश्चात्यशिक्षावकर्षोद्धतधियः, तथापि इदानीन्तनानां बालानां विदेशीयानामनेकेषामसद्गुणाननुकुर्वतां परिल-क्ष्यते शारीरिकं मानसिकञ्च स्वास्थ्यं विनष्टम् । शिक्षयाऽनया, अनुकरणेन च तरुणा-वयसां बुद्धिवृत्तिः स्वतन्त्रता आमूलमेव विनष्टा उपलभ्यते । जागर्त्ति किमेतादृशानां मनसि कदापि जातीयपूर्वगौरवम् ? । चिन्तयन्ति किं ते सर्वे विलुप्तप्राचीनशिल्पवि-ज्ञानादिकम् ? अपि स्मरन्ति ते पितृपितामहादीनामसाधारणशारीरशक्तेः । ब्रह्म-चर्य्याभावादधुनातनेभ्यः 'स्कूल' विद्यागारेभ्यः तिरोहितमार्य्यवीर्य्यम्, दूरीभूता देहशक्तिः, विलुप्तं मानसिकस्वातन्त्र्यम्, अन्तर्हितः व्यक्तित्वप्रकाशः । ततश्च परीक्षाभिया सर्वे एव प्रतिवर्षं यूपकाष्ठसन्निहितच्छागशिशव इव त्रस्ताः कम्पितक-लेवराः । श्रमातिरेकात्ते खलु जीवितकालमकालेनैव ह्रासयन्ति । वङ्गदेशीयानामे-तादृग् अकालमृत्योर्निदानं वर्त्तमानशिक्षापद्धतिरेव । छात्रावस्थायामेव सर्वेऽस्म-द्देशीयाः न केवलमनार्य्याः आर्य्यवंशोद्भवा अपि ब्रह्मचर्य्यविरहिता निर्वीर्य्याः कार्य्याक्षमाश्च भवन्ति । अहो केऽपि न स्मरन्ति प्राचीनायाः वर्णाश्रमपद्धतेः ।

अतीतं प्रायः वर्षशतचतुष्टयम्, तदानीन्तु यवन (मुसलमान)–राज्यसमये वङ्गीयशिक्षापद्धतावासीदन्यविधा रीतिः, परीक्षाभिया तदा न केचन त्रस्ताः शङ्कि-ताश्च आसन् । अध्यापका अपि तीक्ष्णबुद्धयः सन्ततं गवेषणापरायणाः तत्त्वजिज्ञा-सवश्च कालं नयन्ति स्म । तादृशानामनेक एव च्छात्रा उत्तरजीवने प्रज्वाल्य ज्ञानालोकं समग्रमेवेमं देशं समुदभासयन्त । चिन्तामणिप्रणेता गङ्गेशः, रघु-नन्दन-रघुनाथ-कृष्णानन्दादयश्च अद्यापि शिक्षाजगति अमरा इव विराजन्ते । इतश्च प्राग् असंख्या मनस्विनः विमाननौयान-वह्निवाणप्रभृतीनामनेकविधं तत्त्व-माविष्कुर्वन्तः भारतवर्षमिदमुन्नतिमार्गस्य शीर्षदेशं प्रापयामासुः । तेषां हि गवेष-णाप्रसूतमाविष्कृततत्त्वजातं जातं विलुप्तप्रायमिव कालमाहात्म्यात् । इदानीं पुनः पारावार-परपारवासिभिः 'इउरोप'-देशवास्तव्यैर्मनस्विभिरस्मादेव देशात् तत्तत्

संगृह्य सङ्कलय्य च सर्वं क्रमशः प्रकाशयितुं प्रवृत्तम् । शिल्प-विज्ञान रसायनायुर्वेद-धनुर्व्वेदप्रभृतिषु तथाऽष्टादशविद्यासु च† सर्वत्रैव भारतवासिनामार्य्याणामव्याहता प्रतिभाऽनुभूयते ।

विना हि प्राचीनपद्धतेरनुसरणम्, ऋते च ब्रह्मचर्य्यप्रतिपालनं न कदापि समाजस्यास्याधोगतस्य उन्नतिसम्भावना विद्यते । वर्णाश्रमोक्ताचारव्यवहारादिविरहितास्तु इदानीन्तना ब्राह्मणादिवर्णा नचिरादेव विलीनतामेष्यन्तीति नः प्रतिभाति ।

ये किल ब्राह्मणास्त्रैकालिकस्नानसन्ध्योपासनादिपरायणा आसन्, सन्ध्यावन्दनादिकमनिष्पाद्य ये पानीयमपि नाग्रहीषुः, ऊषसि शय्यात्यागकाले देवतानामोच्चारणं येषां प्रात्यहिककर्म्माङ्गभूतमासीत्, हा हन्त तेषामेव वंशेषु समुत्पन्ना नव्यशिक्षिता अदूरदर्शिनः कुलपांशुलाः रात्रिवासो वसाना एव निर्वादं समश्नन्ति । सन्ध्यावन्दनादिकन्तु दूर एवास्ताम् यज्ञसूत्रमप्यपवित्रसूत्रमिति मत्वा अनेके तद्दमाल्यवद् व्यवहरन्ति, निन्दन्ति च बहुधा उपनयनसंस्कारान् । केचित् पुनः परश्रीकातरचेतसः हीनजन्मानः ब्राह्मणचिह्नं यज्ञसूत्रं गले गृहीत्वा ब्राह्मणम्मन्या विराजन्ते । ब्राह्मणा एव यथानियमं स्वधर्म्मं नानुतिष्ठन्ति किं पुनरब्राह्मणाः । ये केचित् लोकदृष्ट्याकर्षणार्थं कथञ्चिदपि सन्ध्यावन्दनादौ प्रभवन्ति तेऽपि कार्य्यान्तरानतिपातं विचिन्त्य यथावकाशमन्यचिन्तापरायणा एव निरन्तरं मन्त्रानुच्चारयन्ति । अहो येषां पूर्वपुरुषाणां सन्ध्याद्युपासनमेव प्राधान्येनानुष्ठेयमासीत्तदन्वयोत्पन्नानामेव 'आङ्गल'-भाषाशिक्षितानां तरलमतीनां तत्तदनुष्ठानं 'निन्दाकार्य्य'मिति प्रतिपन्नम्, किमतःपरमर्हति भवितुमधःपातकारणम् । यत्र हि वर्णाग्रणीनां ब्राह्मणानामेवैतादृगधःपातः तत्रान्येषां वर्णानामवस्था सुतरामेवावर्णनीया ।

भक्ष्याभक्ष्यविचारणायान्तु न लक्ष्यतेऽधुना केषामपि द्वैधीभावः । स्पर्शदोषमदोषं प्रतिपादयन्तो विहरन्ति बहव एव श्रीमन्तः । बृहन्नगरनिवासिनां खलु नव्यसभ्यानामाचारः सर्वथैव नालोचनीयः । अहो मनसीदमिदानीं प्रलयकालनाद इव प्रचण्डं ध्वन्यते-

---

† अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्म्मशास्त्रञ्च विद्या ह्येताश्चतुर्द्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चार्थशासनम् ।

"स्वेच्छाचाररताः सर्व्वे तदेव प्रबलः कलिः ।"

आहारविहारादिषु संयममन्तरेण न कस्यापि स्फुरति मानसिकी वृत्तिः । संयमस्तावत्—

'अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।'

एषु पुनः ब्रह्मचर्य्यमेव छात्राणां प्रागनुष्ठेयम् । तथाच

"ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा प्रव्रजेत्" ।

ब्रह्मचर्य्यं हि सर्वथा स्त्रीसंसर्गराहित्यम् । तथा चोक्तं—

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्" ॥

ब्रह्मचर्य्यप्रतिष्ठायां जातायां वीर्य्यलाभो जायते । ततश्च स वीर्य्यवान् जनः अतिसूक्ष्मेऽपि विषये मनोनिवेशयितुमर्हति । ब्रह्मचारिणां तु शिष्येषूपदेशः सर्वदैवाव्याहतः फलति । आहारसंयमादिष्वपि भगवता मनुना प्रोक्तम्—

वर्ज्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि यानि सर्वाणि प्राणिनाञ्चैव हिंसनम् ॥
अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम् ॥

यद्यपि योगिजनानुष्ठेयानि "यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः" इत्यष्टाङ्गानि छात्राणां कष्टसाध्यानि तथापि आर्य्य-वंशावतंसैः सर्वैरेव वैदिकसन्ध्यान्तर्गतप्राणायामादयः सर्वथा अनुष्ठेयाः । प्राणायामो हि कायारोग्य-कालज्ञानादौ सम्यगुपयोगी । प्राणस्य (मुखनासान्तरसञ्चारिणो-वायोः) आ (समन्तात्) यमनं (गतिविच्छेदः) प्राणायामः । प्राणायामात् पवनजयः, मनोजयश्च । तथाहि—

"मनो यत्र मरुत्तत्र मरुद्यत्र मनस्ततः ।
अतस्तुल्यक्रियावेतौ संवीतौ क्षीरनीरवत् ॥
एकस्य नाशेऽन्यस्य स्याद् नाशो वृत्तौ च वर्त्तनम् ।
ध्वस्तयोरिन्द्रियग्रामध्वंसो मोक्षश्च जायते ॥"

प्राणायामस्य भेदास्त्रिधा ।

'रेचकः पूरकश्चैव कुम्भकश्चेति स त्रिधा ।'

यथानियमं यदि प्राणायामोऽनुष्ठीयेत तदा "क्षीयते प्रकाशावरणम्"। प्रकाशस्य (चित्तसत्त्वगतस्य) यत् आवरणं (रजस्तमोरूपम्) तत् क्षीयते (क्षयं प्राप्नोति) तदनन्तरं "धारणासु योग्यता मनसः ।" रजस्तमोरूपे आवरणे क्षीणे सति तत्क्षीणावरणं मनो यत्र यत्र धार्य्यते तत्रैव स्थिरं भवतीत्यर्थः । "ततः परमवश्यतेन्द्रियाणाम्" । प्राणायामपरायणो जनः इन्द्रियजयी भवतीत्यर्थः । नास्तीह संसारे किमप्यसाध्यमिन्द्रियविजयिनाम् । पुरा तु अस्माकं पूर्वपुरुषादयः नित्यविहितप्राणायामादिकमनुष्ठाय ब्रह्मचर्य्यव्रतञ्च सम्यक् प्रतिपाल्य वर्णाश्रम-नियमानुवर्त्तिनः सर्वमेव ज्ञानं सहजेन बलेन लब्धुं समर्था आसन् । तेषां विद्यावत्ता वीर्य्यवत्ता च सन्ततमेवास्मान् विस्मयसागरे मज्जयन्ति । करतलगतबदरफल-वत् ते निखिलमेव विश्वं प्रत्यक्षं ददृशुः । अष्टादशविद्याश्च सर्वेषामेव तेषामा-यत्ता अभवन् ।

ब्रह्मचर्य्यविहीनानामध्ययनादिकमपि न निर्विघ्नं सम्पद्यते । इन्द्रियसुख-चिन्तयैव केवलया तेषामतिवाह्यते कालः । तथापि ते गर्वस्फीतवक्षसोऽल्पायुषः, पितृपितामहादीनेव विनिन्दन्ति, इतः परं कोऽधिको भवितुमर्हति मूर्खतायाः परिचयः । सन्ध्यावन्दनादिकन्तु भूतमन्त्रमिति मत्वा सर्वे उपहसन्ति । तैस्तु विस्मृतमिदं यत्—

विप्रो वृक्षस्तस्य मूलं हि सन्ध्या
वेदः शाखा धर्म्मकर्म्माणि पत्रम् ।
तस्मात् सन्ध्या यत्नतो रक्षणीया
छिन्ने मूले नैव शाखा न पत्रम् ॥

मुष्टिमेया भारतीया ब्राह्मणा अधुनाऽपि यदि स्वकीयानन्तेवासिनः, स्वकीयानात्मीयवर्गान्, तथाऽन्यानपि सामाजिकान् प्राचीनप्रथामनुसृत्य शिक्षयेयुः आर्य्यजनानुष्ठितकर्म्मसु च प्रवर्त्तयेयुस्तदैव भविष्यति देशस्यास्य समाजस्य च समुन्नतिः, नोचेत् कोऽपि न ब्रह्मण्यधर्म्मशून्यं ब्राह्मणं अतः परं पूजयिष्यति । अचिरादेव द्विजराजप्रभायामन्तर्हितायां भुवनमिदमज्ञानान्धतमसाच्छन्नं भविता ।

दृश्यते हि साम्प्रतं सर्वत्र भारतवासिनः स्वल्पायुषः । अकालमृत्युश्च निरन्तरमेव संघटते । नासीत् पञ्चाशद्वर्षेभ्यः प्राग् ईदृशोऽकालमृत्योः प्रसङ्गः ।

इदानीन्तु अज्ञातश्मश्रव एव तरुणा निष्करुणाः संसारेषु अहरहः परलोकं गच्छन्तो दारयन्ति पित्रोर्मर्म्माणि । विविधविद्यापारं गतोऽपि मनीषी भग्नस्वास्थ्योऽकाले करालकालकवलमलङ्करोति । तथाविधस्य शिक्षितस्य तिरोभावे न केवलं समाजस्य अपितु देशस्याप्यशेषा क्षतिः सम्पद्यते । प्रतिदिनमेव अकालमृतानां बङ्गवासिनां श्मशानोत्थधूमराजिभिः परिपोषतां गच्छति कलेवरं किल देवस्य बलाहकस्य । किमत्र कारणं ? कथं वा इदानीन्तनाः सन्तानाः स्वल्पायुषो जायन्ते ? अत्रेदमुच्यते—प्राचीनाः खलु अस्माकं पितरः संयमधनाः स्वधर्म्मपरायणाश्च आसन् । तेषां प्राणवायुस्तावद् न विषमयेन पश्चिमवायुना संपृक्त आसीत् । ते तु सर्वदा—

"स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ।"
"आत्मीये संस्थितो धर्म्मे मृतोऽपि स्वर्गमश्नुते ॥"

इत्यादिमहाजनवचनमनुसरन्तः यजनयाजनादि-षट्कर्म्म-मार्गाद् "न रेखामात्रमपि व्यतीयुः ।" अस्माकन्तु अधुनातनानां दशाविपर्य्यासो न नैसर्गिकः, अपितु अस्वाभाविक एवायम् । तथा हि सङ्गदोषात् शिक्षादोषाद् वा यदि कस्यचिद् द्वादशे वर्षे यौवनलक्षणं श्मश्रुगुम्फादिकं समुदेति, तदा तत् किं प्राकृतं भवेत् ? यदि तथाविध जनस्य अपरिपक्वेन्द्रियस्य समवयस्कायां पत्न्यां सन्ततिरुत्पद्येत तदा तस्य तावत् सन्तानस्य कति वर्षाणि आयुर्भवेत् ? सन्तानो हि सर्व्वत्र मातृपितृगुणमेवाधत्ते । असम्पूर्णेन्द्रिययोः पित्रोः सन्ताना अपि विकलेन्द्रिया अल्पायुषश्च भविष्यन्ति तत्र नास्ति वितर्कावसरः । पितृ-पितृव्य-पितामहादयो-हि पौत्रमुखदर्शनाकाङ्क्षिणः भ्रातृसुतं नप्तारं वा बाल्ये एव विवाहयन्ति । इत्थं ते तेषां सन्तानानां उन्नतिमार्गमेव सर्वदा स्वेच्छया कण्टकितयन्ति । अपरिणतविवाहा बहव एव दृश्यन्तेऽधुना तरुणाः एम्,ए, (M. A) इत्युपाधिविमण्डिताः । किन्तु दुःखमिदमतीवावहति, कस्य न विद्यते तेषां शिरोरुजा चक्षुःपीड़ा वा ? स्नायविकदौर्व्बल्यञ्च सर्वानेतान् रात्रिन्दिवं पीड़यति । प्राचीनानान्तु अशेषशास्त्रपारदर्शिनामपि कलेवरे न द्वादशवर्षे एव यौवनं पदमधत्त त्रिंशद्वर्षे च वार्द्धक्यम् । आसन् ते अदार्शनिका अपि दर्शनप्रसक्तिसम्पन्नाः, श्रीशून्या अपि सुश्रियः, बलहीना अपि बलवन्तः । किं बहुना ते तु अविषया एव आसन् 'कलिरहस्य'—श्लोकानां—

भविता योषितां सूतिः पञ्चषट्सप्तवार्षिकी ।

नवाष्टदशवर्षाणां पुरुषाणां तथा कलौ ।
पलितोद्भवश्च भवति तदा द्वादशवार्षिकः ।
नातिजीवति वै कश्चित् कलौ वर्षाणि विंशतिम् ॥

ब्राह्मणानां जात्या धर्म्मेण च सह भाषाऽपि अपकर्षं गच्छति । आर्य्यभाषाया अवनतिविधौ इदमेव वयं मूलकारणं मन्यामहे यत्--पुरुषपरम्परया पण्डितवंशोद्भवानां ब्राह्मणानां मध्ये यदि कस्यचित् चत्वारः पञ्च वा पुत्रा विद्यन्ते तदा स ब्राह्मणः तान् सर्वानेव पुत्रान् विजातीयभाषाध्ययने नियोजयति, तत्र तावत् यदि कोऽपि स्थूलबुद्धित्वादात्मनो वार्षिकपरीक्षायामकृतार्थो जायेत तदा तदर्थमर्थव्ययमनर्थकमिति मन्यमानः पिता पश्चात्तमेव दुर्मेधसं पुत्रं संस्कृतशिक्षायां प्रवेशयति । दुरवगाहे तु संस्कृतशास्त्रसागरे तादृशस्य कीदृशः प्रवेशो भवेदिति सहजज्ञानतो एवानुमातुं शक्यते । दृष्ट्वा तु देवभाषाया ईदृगवनतिं भाषाया अस्याः अस्तित्वमपि सुचिरं स्थास्यति न वेति संशयः समुदेति नो मनसि । संस्कृतभाषैव जगति प्राचीनतमा भाषा । या खलु आर्य्यभाषेति कथ्यते । इयमेव सर्वासामपरासां भाषाणां प्राणाः । अमनोयोगितया हि आपामरसाधारणानां भाषेयमिदानीं मृतभाषेति (Dead language) निगद्यते । भाषायामस्यां विशिष्टव्युत्पत्तिमन्तरेण क्रियाकाण्डानभिज्ञानां पुरोधसां तथा भाषाव्याकरणज्ञानहीनानां स्मृतिव्यवस्थापकानाञ्च वाक्ये न कोऽप्यास्थां स्थापयिष्यति । सर्वएव उपहसिष्यन्ति तान् अशिक्षितान् अर्द्धशिक्षितांश्च पण्डिताभिमानिनः । इतः परं नास्ति किमपि भूसुराणामसम्मानकारणम् ।

(क्रमशः)

सुदर्शनोपाख्यानम् ।

तृतीयोंऽशः । १२३ पृष्ठतोऽनुवृत्तम् ।

अथ काशीराजस्य दुहिता शशिकला वन्दिमुखाद् भरद्वाजाश्रमस्थितस्य सर्वसुलक्षणोपेतस्य राजपुत्रस्य सुदर्शनस्य परिचयमवगम्य मनसा'तं वरं वरयितुं चकमे । सुप्रसन्ना जगदम्बा भगवती पूजापरायणां तां शशिकलां स्वप्न समाश्वास्य उवाच असौ सुदर्शनो मम भक्तस्ते वरो भविष्यतीति । तदा सा साध्वी परमानन्दिता तस्थौ । सा कदाचित् कस्यचिद् ब्राह्मणबालकस्य मुखात्

सुदर्शनस्य अलौकिकं गुणग्रामं श्रुत्वा प्रारब्धकर्म्मप्राबल्यात् पूर्वजन्मार्ज्जितानुरागवशात् तं प्रति सातिशयं प्रेमप्रवणचित्ताऽभवत् । तया द्वितीयः कामदेव इव यः कुमारः स्वप्ने दृष्टः तद्रूपमनुदिनमभिध्यायन्ती सा कुसुमधनुषः शरैर्विद्धा परमं मनोविकारं प्राप ।

काशीराजः स्वदुहितरं विवाहयोग्यां दृष्ट्वा तस्या इच्छा-स्वयंवराय यथायोग्यम् आयोजनं चकार । शशिकला तत्समाचारं श्रुत्वा सखीमुखेन स्वमातरं ज्ञापयामास-"मया इतःपूर्वं ध्रुवसन्धिसुतः सुदर्शनः मनसा पतिर्वृतः अन्यं वरं नैव वरिष्यामि" इति । तदा राज्ञी तामभ्युपेत्य उवाच—

"सुदर्शन एकाकी निर्धनो बलहीनो वनवासी कोशहीनो बान्धवैः परित्यक्तः राज्यभ्रष्टो निराश्रयः फलमूलाशनो दुर्भगः । युधाजित् सततं तस्य वधकामोऽस्ति तमृते स्वेच्छया स्वयम्वरसभायां वरान्तरं वरयस्व ॥"

शशिकला उवाच—

"तमेव वरं वरयितुं भगवत्याऽहं स्वप्ने समादिष्टा, तमृते अन्यं वरं नैव वरिष्यामि । मम चित्तपटे सुदर्शन एव पतिश्चित्रितः । स्त्रीणां भर्तृशुश्रूषणं स्वर्गदं मोक्षदञ्च, पतिरेव स्त्रीणां देवता । तं पतिदेवं मम हृदयाद्विराकृत्य देवान्तरं स्थापयितुं न कदाऽपि इच्छामि । दैवं बलं सर्वथा अनुसरणीयम् । "मद्वशे देवाः सर्वे वर्त्तन्ते शङ्करादयः ॥" तस्या भगवत्या आदेशः कदाऽपि मिथ्या नैव भविष्यति । यथा मे कान्तः सुदर्शनोऽत्रायाति तथा क्रियताम् ॥"

राज्ञी कन्यायास्तद्वचनमाकर्ण्य शशिकलायाः सुदर्शनवरणे दृढमाग्रहमभिलषितं राज्ञे निवेदयामास ।

अथ शशिकला कञ्चित् मुनिं भरद्वाजाश्रमे प्रेषयामास । ततः स मुनिः भरद्वाजाश्रमं गत्वा तस्याः स्वयम्वरवार्त्तां सुदर्शनं विज्ञापयामास । सुदर्शनस्तु तज् ज्ञात्वा स्वयंवरसमागमने निश्चयं चकार । तदा मनोरमा रथमारुह्य गन्तुकामं सुदर्शनं आशीर्भिरुवाच-"वत्स ! अहमपि त्वया सह गमिष्यामि यतोऽहं निमेषार्द्धमपि त्वां विना स्थातुं नोत्सहे ।"

ततो विप्रैर्दत्ताशिषः सुदर्शनो मनोरमा धात्रेयी च रथमारुह्य निर्ययुः वाराणसीञ्च प्रापुः । तत्र सुबाहुना निवेशार्थं गृहम् अन्नपानादिकञ्च दत्तम् । नानादेशाधिपा राजानस्तत्र समागताः, युधाजिदपि स्वदौहित्रेण समन्वित

आयातः । विवाहसभायां युधाजित् सुदर्शनं हन्तुकाम आसीत् तद्दृष्ट्वा केरलाधिपतिः प्राह—

"अस्मिन् इच्छास्वयंवरे युद्धं न कर्त्तव्यम् अत्र बलेन हरणं न स्यात्, कन्येच्छया तु वरणं, त्वया अन्यायेन असौ कोशलाधिपतेः सुतः पूर्वं राज्यात् प्रवासितः । कथमेनं राजपुत्रं हनिष्यसि? अस्य जगतः कश्चित् जगत्पतिः शास्ता अस्ति" "धर्म्मो जयति नाधर्म्मः सत्यं जयति नानृतम् । माऽनयं कुरु राजेन्द्र त्यज पापमतिं किल ॥"

ततः सर्वे नृपाः सुबाहुं सभामध्ये समाहूय तमूचुः "राजन् किं ते चिकीर्षितं? कस्मै पुत्रीं प्रदातुमिच्छसि तथ्यो ब्रूहि ।"

सुबाहुरुवाच—" शशिकलया मनसा सुदर्शनो वृतः, मया निवारिताऽपि सा मद्वचो न गृह्णाति किं करोमि सुतायाः मनो मे वशे नैव वर्त्तते । सुदर्शनोऽपि अत्राऽगतः ।"

ततः सभासीनाः सर्वे सुदर्शनमाहूय ऊचुः—

" सैन्यहीनः कोशहीनो बलहीनस्त्वमेकाकी कथमत्र समायातः, त्वया सह-योद्धुकामा बहवो नृपतयःससैन्या अत्र उपस्थिताः, भ्राता ते शत्रुजित् तस्य च मातामहो युधाजित् त्वया सह विरोधायात्र कृतनिश्चयौ वर्त्तेते त्वां हन्तुञ्च परिकाङ्क्षतः ।"

सुदर्शन उवाच—

"या हि महामाया जगदम्बिका भवानी, यस्यास्त्रिगुणात्मिकायाः प्रकृतेर्गुणैरेव क्रियमाणानि सर्वाणि कर्म्माणि दृश्यन्ते, तया भगवत्या स्वप्ने प्रेरितोऽहमद्य अत्र स्वयंवरं श्रुत्वा द्रष्टुकाम इहागतः । मदभीप्सितं किमपि कर्त्तव्यमत्र नास्ति, नाहङ्कारविमूढात्माऽहं माम् कस्यापि कर्म्मणः कर्त्तारमभिमन्ये । अहं सततयुक्तचित्तः सततं चिन्तयन् तां महामायां पर्य्युपासे, तया यद्विहितं तदेवावश्यमेव भविष्यति अहं सर्वथा तदधीनोऽस्मि । बलहीनस्य निःसहायस्य कोशहीनस्यापि मे का चिन्ता । तथाहि जातस्य मृत्युर्ध्रुवः, मृतस्य च जन्म ध्रुवं तस्मादपरिहार्य्येऽर्थे नाहं शोचामि । क्षत्रियस्य धर्म्यात् युद्धादन्यत् श्रेयो न वर्त्तते । कर्म्मण्येवाधिकारो मे न तु फलेषु । यो मया सह शत्रुतां करिष्यति, तस्य जगदम्बिका शास्त्री भविष्यति । अहं शत्रुतां न जानामि ब्रह्मविष्णुहरादयोऽपि तां महाशक्तिमृते स्पन्दितुमपि न शक्नुवन्ति, सा यदिच्छति तदेवाहं कुर्य्याम् । अशक्तस्य शक्तस्य वा मे नाये

वा पराजये आनन्दो लज्जा वा नास्ति । स्वकर्म्मवशगो जीवोऽहं दैवमेव परं मत्वा न बिभेमि, अहं नित्यं सततं भगवत्याः स्मरणं करोमि, सा विश्वजननी देवी अवश्यमेव मे कल्याणं करिष्यति । पूर्वजन्मार्ज्जितं शुभं वा अशुभं कर्म्म अवश्यमेव भोक्तव्यं, जीवः स्वकृतस्यैव कर्म्मणो भोगेन सुखं दुःखञ्चाप्नोति इति यो विजानाति स दुःखं प्राप्य न शोचति । वर्त्तमानशत्रुर्मे दुःखस्य निमित्तकारणमात्रं तस्य हि मूलकारणं मे पूर्वजन्मार्जितं कर्म्म । यस्तु तत्त्वमेतत् न जानाति अल्पमतिः स निमित्तकारणे वैरं करोति । यो मया सह वैरं करिष्यति चण्डिकाज्ञया स तस्य फलं प्राप्स्यति ।"

ततः सर्वे नृपतयः सुदर्शनं प्रति सन्तुष्टास्तद्दिने स्वं स्वमाश्रमं प्राप्य सुस्थिरा बभूवुः । अथाऽपरेऽह्नि शुभे काले सुबाहुना स्वयंवरसभा आहूता । स काशीपतिः रूपगुणसम्पन्नं वरं यथारुचि वरयितुं सुसज्जितां अन्तःपुरस्थां स्वदुहितरं शशिकलामादिदेश । तच्छ्रुत्वा शशिकला प्राह—

पितः ! मया धर्म्मशास्त्रे इदं श्रुतं यथा—'एक एव वरो नार्य्या निरीक्ष्यः स्यान्न चापरः ॥' यदि वारस्त्री सा एव बहुजनानां दृष्टिपथे गत्वा कदाचिद्वा विपणौ गत्वा तत्र स्थितान् नरान् दृष्ट्वा निजमानसे तेषां गुणागुणविचारणां करोति । एवं या नारी बहून् पश्यति तस्याः पातिव्रत्यं हीयते । मया पूर्वं सर्वात्मना सुदर्शनो वृतः, तमृते वरान्तरं वरितुं नैव इच्छामि । स्वयंवरसभामण्डपे आसीनानां कामुकानां नृपाणां दृष्टिपथेऽहं नैव गमिष्यामि । तात ! यदि त्वं मम शुभमिच्छसि मां विवाहविधिना सुदर्शनाय देहि । तथा च कविना साधूक्तं—

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ॥"

एवं सभामण्डपगमने पराङ्मुखीं शशिकलां श्रुत्वा काशीपतिः दुश्चिन्तातुरः सभासन्निधौ गत्वा सर्वान् प्रणम्य तानुवाच—

"शशिकला मया तस्या मात्रा च बहुशः प्रेर्य्यमाणाऽपि अत्र नाऽयाति । अहं बहुरत्नानि वस्त्राणि च गजान् रथान् ददामि मत्सकाशाद् यथायोग्यं पूजादिकं गृहीत्वा कृपां कृत्वा भवन्तः स्वस्वसदनानि व्रजन्तु । अहं युष्माकं दासो युष्माभिरनुग्राह्योऽहं, मम दुर्विनीता सुता भवद्भिः स्वसुतेव मन्तव्या ।" सुबाहोस्तद्वचनं श्रुत्वा केचन राजानः किमपि नोचुः । युधाजित्तु क्रोधरक्ताक्षस्तमुवाच—

"सर्वान् नृपान् अवमन्य सुदर्शनाय चेत्त्वं पुत्रीं दातुमिच्छसि तदा कथं

मूर्खेण त्वया स्वयम्वरो विरचितः, एते सर्वे राजानश्च श्राहूताः। भिट्टुनाय निर्बलाय राज्यहीनाय एकाकिने सुदर्शनाय सुतां दत्वा किं सुखं लप्स्यसे। स पूर्वं मया भरद्वाजाश्रमे मुनिहेतोर्मुक्तः, अद्य तं नैवाहं मोचयिष्यामि। कन्यायाः शुभमिच्छता त्वया कुलं वित्तं बलं रूपं राज्यं दुर्गं सुहृज्जनं दृष्ट्वा कन्या प्रदातव्या। यदि त्वं शुभमिच्छसि ते सुतां सभामण्डपे समानय, दौहित्राय मे तां देहि, अन्यथाऽहमद्य त्वां हनिष्यामि, पश्चात् सुदर्शनं हनिष्याम, तत इमां कन्यां बलात् नेष्यामि॥"

तच्छ्रुत्वा सुबाहुरन्तःपुरं गत्वा स्वभार्यया सह सुतां प्राह—

"वत्से! यदि त्वं सुदर्शनं वरिष्यसि सर्वैर्नृपतिभिः सह मे विग्रहो भविष्यति। बलवान् युधाजित् त्वाञ्च माञ्च हनिष्यति। एवं कलहे सति पश्चात्ते द्वितीयः पतिर्भविष्यति। अतः सुदर्शनमृते अन्यं वरं वृणुष्व अथवा यदि ते रोचते पणं विदधामि। यः कश्चित् बलवत्तरः पणं पालयिष्यति, त्वं तमेव वरिष्यसि। एवं कृते नृपाणान्तु विवादः शाम्येत्।"

शशिकलोवाच—

"पितः! मया श्रुतं 'कारणं पुण्यपापानां मन एव महीपते!' पूर्वं मया मनसा वृतं सुदर्शनं त्यक्त्वा कथमन्यं वृणे। त्वया पणे कृते सति यदि बहवो राजानः तत्पणस्य पालयितारो भविष्यन्ति तदाऽहं सर्वेषां वशगा भवितुमर्हामि, तेषां मध्ये विवादश्च सम्भविष्यति, तदा त्वं किं करिष्यसि। तात! चिन्तां मा कुरु, विवाहविधिना मां सुदर्शनाय देहि। उक्तञ्च—

'यन्नामकीर्त्तनादेव दुःखौघो विलयं व्रजेत्।
तां स्मृत्वा परमां शक्तिं कुरु कार्य्यमतन्द्रितः॥"

सा जगदम्बा नः शं विधास्यति। श्वः स्वयम्वरो भविष्यतीत्युक्त्वा अद्य सर्वान् नृपान् विसर्ज्जय, एतौ वेदोक्तविधिना मां सुदर्शनाय देहि। श्वो माञ्च तेन सह विसर्जय, एकैवाहं तेन सह गमिष्यामि। यदि केचिन्नृपाः संग्रामं कर्त्तुमुद्यता भवेयुः, तदा भगवती मे भक्त्या सन्तुष्टा तान् अभिभविष्यति, माऽत्र सन्देहलवं कुरु।"

तस्यास्तद्वचनमाकर्ण्य काशीपतिः सभामण्डपं गत्वोवाच—

"भो समवेता राजानः! अद्य भवन्तः शिविराणि गच्छन्तु, मत्प्रेरितञ्च भक्ष्यपेयादिकं यथारुचि गृह्णन्तु। श्वः सर्वैरत्र आगन्तव्यम्। किं करोमि, अद्य मे सुता अत्र न आयाति, प्रातः समाश्वास्यानयिष्ये।"

तदाकर्ण्य सर्वे नृपाः स्वानि निकेतनानि ययुः।

षट्पदी विवरणम् ।

विवरणपञ्चाङ्गनिर्णयाभिधव्याख्यासमलंकृतम् ।

प्रथमवर्षीय ४र्थसंख्यायाः २७१ पृष्ठतोऽनुवृत्तम् ।

अथ तितिक्षानन्तरमुपरतिं व्याख्यास्यन् तन्निरूपणे पौर्वापर्य्यनिबन्धनमाह— तितिक्षया चेति— चो हेतौ

षट्-विवरणम्—तितिक्षया चोपरतिः सुसाध्या द्विधाऽपि साक्षान्मतभेदभिन्ना ।
हिताहितस्पर्शविरोधिबुद्ध्या समाप्तिरेवेन्द्रियकर्म्मवृत्त्योः ॥ २९ ॥

यत उपरतिर्वक्ष्यमाणलक्षणा, मतभेदभिन्ना मतयोर्भेदेन पार्थक्येन पृथग्भूता, साक्षात् द्विधाऽपि स्वरूपतो द्विप्रकाराऽपि, तितिक्षया कथितरूपतितिक्षाद्वारैव सुसाध्या इत्यन्वयः । तथा—चोपजीव्योपजीवकभावसम्बन्धाधीनजिज्ञासयैवोपरतिनिरूपणमिति भावः । निर्वचनमाह—हिताहितेति । हिताहितयोः प्रियाप्रिययोः स्पर्शोऽनुभवः, तद्विरोधिनी या बुद्धिः, "मा नामेन्द्रियाणि विषयेषु प्रवर्त्तन्ताम्" 'अलं च क्रियाभिरनर्थजालजटिलाभि"रित्येवंरूपा, तया इन्द्रियकर्म्मवृत्त्योः (इन्द्रियवृत्तिरिन्द्रियाधीनमालोचनं, कर्म्मवृत्तिः कर्म्मणामारम्भः, तयोः) समाप्तिरेव विराम एव, उपरतिरित्यनुषज्यते । अयमर्थः, निर्विशेषावभासलक्षणायां तितिक्षायां विषयेषूपेक्षाप्रत्ययात्मकवैराग्येन समुदाचरन्त्यामिन्द्रियव्यापारेषु कर्म्मारम्भेषु च प्रियाप्रियपरिच्छेदनिमित्तभावेनोपगन्तव्येषु प्रयोजनोत्पत्तेरशक्यत्वपर्य्यालोचनया "विरमन्त्विन्द्रियाणि" "विरमतु कर्म्म" इत्यादिबुद्धिबलेन तयोर्व्यापाररोधः स्वरसमिद्धः, तत्रचोपरतिशब्द उपरमणमुपरतिरितियोगेन वर्त्तते । तथाचेन्द्रियाणां निवृत्तानां व्यापारप्रागभावपरिपालनरूपाया इन्द्रियवृत्तिसमाप्तेरिव विहितानां कर्म्मणां विधितस्त्यागरूपायाः कर्म्मसमाप्तेरपि प्रकृते उपरतिशब्दार्थताया वक्तव्यत्वात्, तादृशबुद्धिप्रयोज्येन्द्रियकर्म्मनिवृत्तिस्तादृशबुद्धिप्रयोज्यप्राणसन्तानान्यव्यापारसामान्यनिवृत्तिर्वोपरतिरित्युभयसाधारणं लक्षणं विवक्षितम् । अत्रच मरणमूर्च्छादिष्वतिव्याप्ते र्जीवनौपयिकव्यापारादिजुषि भरतादौ चासम्भवस्य वारणाय तादृशबुद्धिप्रयोज्यत्वं निवृत्तिविशेषणम् * । द्वितीये समाधिसिद्धिभ्यां सांकर्य्यस्य उपरतमात्रे साधके चाव्याप्तेश्च वारणाय व्यापारेऽन्यान्तम् । तत्रापि च मानसपदं बहिरिन्द्रियव्यापारनिवृत्त्यसंग्रहनिरासाय, ज्ञानपदं च ध्यानसंकल्पादिलक्षणकर्म्मनिवृत्तिसंग्राहायैवेति बोध्यम् । यद्यप्येवमपि समाधिसिद्धिवारणं दुःशकमेव, तथाऽपि उपधेय-

* तथाच भावनाद्यननुगुणेष्वेव कर्म्मेन्द्रियव्यापारेषु दर्शितबुद्धेरावश्यकतया वस्तुगत्या तादृश्या बुद्ध्या प्रयोज्यानिवृत्तिः, भावनाद्यनुगुणविषये कर्म्मेन्द्रिययोर्व्यापारनिवृत्तिरेवेति तद्विशेषणमाहात्म्याऽसम्भवव्युदास इति बोध्यम् ।

संकरेऽप्युपाधेरसंकरात्तत्प्रसंगो न दोषाय । समानश्चैव पर्य्यनुयोगः परिहारश्चा-न्यत्रापीति सुधीभिर्विभावनीयम् ॥ २९ ॥

इदानीं लक्षितामुपरतितुर्यीं मूले संगमयति, तदुपरतितुर्यमाहेति ।

सं-विवरणम्—तदुपरतितुर्यमाह "तारय संसारसागरतोऽन्त्येन ।

श्रुतिनिहितक्रमभंगोऽदोष इत्यनुपदमुपादर्शि ॥ ३० ॥

"संसार सागरतस्तारय" इत्यन्वययोग्येन "तारय संसारसागरत इत्यन्त्येन ग्रंथेनेति शेषः । तत्, निरुक्तमुपरतितुर्यम्, आह उक्तवानाचार्य्य इति वाक्यशेषः । यथा चैतेन ग्रंथांशेन तद्विवक्षितं तथाऽग्रे निष्कर्षेणोन्मथनादौ व्यक्तीभविष्यति । स्यादेतत्, श्रुत्याहि शमदमयोरनन्तरमुपरतिरेव निर्द्दिष्टा, न तितिक्षा, नवा तितिक्षानन्तरमुपरतिरतोऽत्र श्रौतक्रमत्यागेन प्रक्रमभंगो दोषस्तथाचाचार्य्याः कथं युक्तवादिनःस्युरित्याशंक्य परिहरति, श्रुतिनिहितेति, श्रुत्याविवक्षितेत्यर्थकम् । क्रमभंगः, तितिक्षोपरत्योः पौर्वापर्य्यविपर्य्ययः, अदोष इति, प्रकृते न श्रोतॄणामवधानहानिकर इत्यर्थः । अनुपदमुपादर्शि, शमदमादावुक्तोऽप्यभिसंधिरत्राप्युक्तप्रायो वेदितव्य इत्याशयः । एतदुक्तं भवति, पूर्वोदाहृतश्रुतौ वैराग्यानन्तरमपठिताऽपि तितिक्षा वैराग्यं विना दुःसम्पाद्यतया यथा वैराग्यादनन्तरं निरूपणमन्वभूत्, यथावा तत्रैव शमानन्तरश्रुतोऽपि दमः शक्यानुष्ठानतया शमात्प्रागेव निरूपितस्तथा प्रकृतेऽपि उपरतेः पूर्वमेव तितिक्षाया आवश्यकत्वात्सुकरानुष्ठानत्वाच्च श्रौतक्रममनादृत्यैव यथोक्तक्रमेणोपन्यास इति सुधीभिरवधेयम् ॥ ३० ॥

अथोपरतेरुपपादनार्थं तल्लक्षणमव्याप्त्या दूषयितुमाशंकते, आसंस्ते भरतादय इत्यादिना—

सं० विवरणम्—आसंस्तेभरतादयोऽपि निखिलव्यापारभाजस्ततः

किं नैवोपरतास्तथाच जनके राजर्षिशब्दः कुतः ? ।

धर्मे ज्ञानमयो हिताय जगतां तद् याज्ञवल्क्यो मुनि-

र्नो व्याख्यातुमलं तथाह्युपरतौ सर्वक्रिया-व्याहतिः ॥ ३१ ॥

भरतादयोऽपि निखिलव्यापारभाजः अन्ततो जीवनयात्रानिर्वाहोपयुक्तपानाशनशयनविश्रामादिव्यापारभाज आसन् । किमाक्षेपे, ते भरतादय उपरता न उपरतिभाजो नासन् ? अवश्यं उपरतिनिष्णाता आसन्नित्यर्थः । परन्तु त्वदुक्तमुपरतिलक्षणं तदीयोपरतावव्याप्तमित्याशयः । ननु भरतस्य परप्रयुक्त्यैव तास्ताः क्रियाः स्मर्य्यन्ते, तत्कृतोऽव्याप्तिरित्याशयेनाह· तथाचेति· तथाशब्दः पुनरर्थे,

चकारोऽन्वाचयवाची । जनके मिथिलाधिपतौ, राजर्षिशब्दः, राजा चासावृषिश्चेति विग्रहसमानार्थकशब्दबोध्यत्वम् । कुतः कथम् ? सत्येव राज्ये त्यागे राजर्षिशब्दः सम्भवी· सच त्वदुक्तरीत्योपरतिलक्षणे तस्य न सम्भवतीत्यर्थः । स्यादेतत्, लोकदृष्ट्या खलु समारोपितसद्भावं सोपुप्तान्यदीयशरीरमिव व्यापारजातं भरतादेर्न जातु दृढतरप्रमाणपद्धतिमध्यास्ते, तथा परिभाषया पूर्ववृत्तादिविषयया वा प्रवृत्तो जनके राजर्षिशब्दो नतरां चोद्यम इत्यनुशयं मनसिकृत्य कार्य्यलिंगावधृतव्यापारे याज्ञवल्क्यादौ दूषणमाचष्टे, धर्म ज्ञानमिति । अथो अथापि, मुनिः याज्ञवल्क्यः, जगतां प्राणिनां हिताय धर्म ज्ञानं च न व्याख्यातुमलं, व्याख्यातुं न प्रभवेत्, एतदेव समर्थयति, तथाहीति । उपरतौ त्वदुपदर्शितलक्षणायामाश्रयणीयायामितिशेषः, सर्वक्रियाव्याहतेः, सर्वक्रियोपरमावश्यम्भावात्, इन्द्रियवृत्तिपरिसमाप्तौ विहितानुष्ठानपरिवर्ज्जनरूपायां च तस्यां कायेन्द्रियमनोव्यापारानुदयेनासमर्थतया याज्ञवल्क्यादेर्धर्मज्ञानादिप्रतिपादकशास्त्रप्रणयनमसम्भव्येवेत्याशयः । इदमुपलक्षणम् । साधकानामुत्तरोत्तरोपायानुष्ठानेषु प्रवृत्तानां व्यापारशतमन्यरं जीवितमिति दर्शितोपरतिरसम्भवग्रस्तैवेति । एतेन सिद्धव्यपाश्रयोऽसंग्रहः, साधकमात्रप्रवृत्तेषु साधनलक्षणेषु अदोष इत्यपास्तम् । दर्शितदिशा साधकासंग्रहस्यापि शक्योद्भावनत्वादिति हृदयम् ॥ ३१ ॥

शंकितं दूषणं परिहरति, स्यादेवमित्यादिना ।

सं० विवरणम्-स्यादेवं यदिवृत्तिमात्रविरहो निर्वक्तुमिष्टो भवेत्,

किन्त्वज्ञानविलासलोलमनसामुत्सर्गवृत्त्युद्भवः ।
वास्योद्वासकभाव एव विजयी यो राजते राजवत्,
तस्यैवेह विवक्षितः परिभवः प्रत्याहृतप्रक्रमः ॥ ३२ ॥

यदि वृत्तिमात्रविरहः, कायेन्द्रियमनोव्यापारसामान्याभावो निर्वक्तुमिष्टः प्रागुक्तोपरतिलक्षणत्वेन निर्विवक्षितः भवेत्, स्यादेवम्, एवमेवं सति पूर्वोक्तदिशाऽव्याप्तिरसम्भवो वा स्यादित्यन्वयः । पृच्छति किंत्विति· किंतर्हि विवक्षितमित्यर्थः । उत्तरयति· अज्ञानेति, अज्ञानं मूलाविद्या तस्य विलासेन विक्षेपशक्त्या लोलं चञ्चलं मनो येषां तेषां मायाविजृम्भणानवस्थितानियतपरिणतिप्रवणान्तःकरणानां संसारिणामितियावत् । उत्सर्गवृत्त्युद्भवः उत्सर्गतो बाधकं विना या वृत्तयः प्रवृत्तयः, शरीरेन्द्रियव्यापाराः ताभ्य उदयो यस्य, तादृशः स एषः, सर्वप्रमातृबन्धापादकत्वाद् विजयी, यो राजवत् अपराधीनवृत्तिः, अप्रतिहतगतिश्च राजते· वास्योद्वासक-

भावः उपर शब्दयोरञ्जकभावः, कौशलापरनामाशक्तिविशेषः शरीरेन्द्रियमनसां स्वस्वव्यापारैरित्यादिः । इह उपरतिलक्षणे, घटकत्वं सप्तम्यर्थः, तस्य निरुक्तवास्यवासकभावस्य, प्रत्याहृतः पर्य्युदस्तः प्रक्रम आरम्भो यत्र तादृशः परिभवस्तिरोभावः सजातीयोत्तरोत्तरव्यक्त्यनुत्पाद इति यावत्, विवक्षित इति वाक्यशेषः । अयमभिसन्धिः—सर्वो हि चेतनोऽनुदिनमुपचितगर्द्धो विषयेषु कायेन्द्रियमनोभिः प्रवर्त्तमानः तेषु तेषु व्यापारेषु परिशीलितोऽभ्यासजपाटवमात्मनः शरीरेन्द्रियादिषु समासञ्जयति । यतोऽस्य पटुपटुतरादिव्यवहारव्यवस्था तत्तत्कार्य्योपाधावायतते यद्व्यतिरेकेण पुनरपटुरनभ्यस्तइत्यादिव्यवहारोऽपि इति सर्वजनीनमेतत् ।

स च पाटवापरपर्य्यायः शक्तिविशेषोऽत्र वास्यवासकभावपदेनोपन्यस्तः । स एव च विपर्य्ययवासनासनाथो निरवधिनिरर्गलमिमं कायेन्द्रियादिभिर्विषयजाले विनिक्षिपन्विहिताविहितनिर्विशेषं कर्म्मस्वभिव्यंजयन् तदाशयराशिना बंभ्रामयति प्रमातारम् । यतएवास्य दुर्वहमपि वस्तुजातमिन्द्रियैः सुखग्राह्यमिव दुष्करमपि क्लेशबहुलमपि कर्मवृन्दं सुकरमिव प्रयते, ततश्च भोगवासनाराशिः सुप्रचुरप्रचारमुपचीयमानो भोगायाभिमुखीकरोत्यधिकतरमिति न तिरोहितमिदं परीक्षकाणाम् । तदस्य प्रवाहतोऽनुवर्त्तमानस्यापि नित्यानित्यवस्तुविवेकवैराग्यदमतितिक्षाभिरूपोद्बलिततयाऽधिकबलेनोपदर्शितविरोधिबुद्धितज्जनितवासनाराशिनाऽऽरम्भानुत्पाद एव तत्तद्व्यापाराणामभिभवः प्रकृते—उपरतिशब्देन विवक्षितः । सच फलतः श्रवणादि—व्यतिरिक्तवस्त्वनधिकारलक्षणो भरतजनकयाज्ञवल्क्यसाधारण इति कथमसम्भवो वक्तुमर्हः ? न च तेषामपि जीवनौपयिकव्यापारावश्यम्भावेन तदवस्थः पुनरसम्भव इति वाच्यम् । जीवनयात्रौपयिकव्यापारकलापस्य श्रवणाद्यनुगतत्वेन तन्नान्तरीयकतया श्रवणादिविरोधिव्यापारोपशमलक्षणोपरतिविघटकत्वायोगादिति हृदयम् ॥ ३२ ॥

अथावसरप्राप्तं निष्कर्षमाह—सुप्तानि इत्यादिना—

व० विवरणम्—सुप्तानि खानि च विनिद्रितमंगजात-
मुद्वेगमस्य न कथंचन कुर्वते यत् ।
यन्नान्तरीयकबहिर्व्यतिषंगदोषै-
र्देहेन्द्रियाणि रहितानि हितानि तानि ॥ ३३ ॥

खानि इन्द्रियाणि । सुप्तानि निर्व्यापाराणि वृत्तिविधुराणीतियावत् । चो विकल्पार्थो मतभेदज्ञापनार्थश्च । अंगजातं शरीरावयवसमूहः, विनिद्रितं चेष्टाहीनं सत्

उद्वेगं विक्षेपातिरेकम् यस्य प्रमातुः कथंचन न कुर्वते यत्, तत् उपरतिरित्यध्याहारः। श्रवणादिव्यतिरिक्तवस्तुमात्रगोचरालोचनवृत्तिरहितानि यदेन्द्रियाणि भवन्ति, यदा वा कायस्य तद्व्यतीतवस्त्वाभिमुख्येन चेष्टाविरहो भवति सैवोक्तलक्षणोपरतिरित्यर्थः। ननूक्तमुक्तलक्षणोपरतिर्न साधनं सिद्धिं वाऽनुविधत्त इति अतः परमनिष्कर्षमाह, यद्विति· यानीत्यर्थः, यद्विति निपातो बहुवचनान्तः। नान्तरीयकेभ्यो वहिः श्रवणाद्यविनाभूतव्यतिरिक्तविषयेषु ये व्यतिषंगादयो दोषास्तै रहितानि· देहेन्द्रियाणि· तान्येव हितानि· निरुक्तोपरतिलक्षणोपयुक्तानि भवन्तीत्यन्वयः। इदमुपलक्षणम्। कर्म्मणां ध्यानसंकल्पादिपर्य्यवसानानामन्तःकरणोपरञ्जकत्वात्तदपि तत्तत्कर्म्मप्रबन्धरहितमुपरतियुक्तमवगन्तव्यम्। उक्तप्रायश्चात्राभिसन्धिः ॥ ३३ ॥

भवेदेवं, यद्युपरतिं विना नोद्वेतुमीशेत विद्या, नत्वेवम्, तथाहि· विक्षेपः किल प्रपंचप्रत्ययोऽस्य तत्स्वरूपमात्रगोचरो वा स्यात्तत्सत्तागोचरो वा ?। आद्ये प्रपञ्चबाधाध्यवसायलक्षणविद्यायास्तेन विरोधासम्भवः, विरोधानवगाहित्वात्। अन्त्येऽपि तदुपमर्द्दात्मनो बाधप्रत्ययस्य वस्तुनिबन्धनस्य प्रबलतयाऽशास्त्रेण प्रपञ्चप्रत्ययेन प्रतिबन्धायोगात्। एतेनानुपजातविरोधिना विक्षेपेण उपजातविरोधितया दुर्बला विद्यैव बाध्यत इति समाहितम्। उपजातविरोधितायाः बलवत्त्वाविनाभावितया बाधकत्व एवोपयोगात्। अन्यथा विद्याया विक्षेपतो दौर्बल्ये तेन प्रतिरोधादात्मानमेव नासादयेत्। अतएव च पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्। इत्यभियुक्तोक्तिरपि संगच्छत इत्याशंक्य उपरतेर्विद्यास्वरूपानुपयुक्तत्वेऽपि विद्याफल एवापेक्षितसंविधानत्वात्· चेत्रप्रदाहपूर्वक·कर्षणन्यायेन बहुतरान्तर्गडुविक्षेपसंस्कारतिरस्कारकरणेनायासलाघवद्वाराऽऽहत्यैवापवर्गसम्पादनानुकूलत्वात् विद्यावदेवावश्यकत्वं दिदर्शयिषुः प्रघट्टकमारचयति भोगो हीत्यादिना·

सं० विवरणम्—भोगो हि कर्म्माशययोनिरेवं कर्माशयोऽप्युपभोगयोनिः।
बीजाङ्कुरन्यायमनुक्रमन्तौ संहत्य तौ बन्धपदाभिधेयौ ॥ ३४ ॥

हिर्हेत्वर्थे· भोगः सुखदुःखतत्साधनगोचरोऽनुभवः, कर्म्माशययोनिः, साक्षात्परम्परया वा धर्म्माधर्मप्रबन्धसम्पादकः, अथाप्येवमेव—

कर्माशयो धर्माधर्मप्रबन्धः, उपभोगयोनिः, सुखदुःखतदभावादिगोचरानुभवहेतुः, अत इति पूरणीयम्· तौ भोगकर्म्माशयप्रबन्धौ, बीजांकुरन्यायं बीजादंकुरमंकुराद्बीजमित्यनादिपरम्परासमशीलतामनुक्रमन्तौ पर्य्यायत उपगच्छन्तौ

संहत्य मिलित्वा, बन्धपदाभिधेयौ बन्धपदबोध्यौ, भवत इतिशेषः। अयमर्थः, प्रमाता खल्विह विषयेभ्यः सुखदुःखे अनुभूय सुखहेतुष्वनुरज्यति विद्वेष्टि च दुःखहेतून् तावेतौ रागद्वेषौ विषयस्य प्रियाप्रियव्यवहारव्यवस्थां कुरुतः। ताभ्यां चानुरागद्वेषाभ्यां प्रवर्त्तमानोऽनुरञ्जनीयान् (प्रियान्) अनुगृह्णाति, निगृह्णाति (उपहन्ति) चाप्रियान् (विद्विष्टान्)। ताभ्यां पुनरनुग्रहोपघाताभ्यां धर्माधर्मावुपचिनोति, ताविमौ धर्म्माधर्मौ कर्म्माशयैराहितौ सुखदुःखे प्रसूय तदुपभोगं सम्पादयतः प्राणभृताम्। अमुमेवार्थं "रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः। कार्यो ह्यस्य भवेद्दोषः पुण्यापुण्यमितिस्थितिरित्यादिका स्मृतिः, "वीतरागजन्मादर्शनाद् दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः, नानुपमृद्योपभोगः सम्भवतीत्यादिर्न्यायश्च समर्थयतः। तदिदं सुखदुःखरागद्वेषधर्माधर्मैर्हेतुफलभावेनानारतमावर्त्तमानैरन्वितं षडरं संसारचक्रं भ्रामं भ्रामं भोक्तृयाममिममपारे विषयकान्तारे स्ववशमभिनिवेशयति। अथास्यायमेव वशीभावो बन्धनसमाज्ञातो दर्शितानादिधर्म्माधर्मादिप्रबन्धनिबन्धन एवेति सोऽपि बन्धशब्दभाग् भवतीति।

इदं पुनरिहावधेयम्—विक्षेपो हि बाह्याभ्यन्तरप्रपञ्चप्रत्यय उपायोपेयभावेन व्यवस्थितानाद्यनवस्थितपरम्परोपेतो न जातु बाधकप्रत्ययमात्रेण शक्यः समुच्छेत्तुमविरोधादित्युक्तम्। सति च तस्मिन् दृढोऽपि बाधकप्रत्ययो विद्याऽपरपर्यायो नतरामपवर्गमुत्पादयति, नालमस्य कुशलमप्याकलयितुमृते बन्धनिर्हरणात्। न च प्रपञ्चबाधनिश्चयस्यैव प्रकृते बाधकप्रत्ययत्वात् तदभ्युदये प्रपञ्चप्रत्यय एव नोत्पत्तुमर्हं इति वाच्यम्। सत्यत्वेन प्रपञ्चाध्यवसायविरोधिन एव तदीयमिथ्यात्वनिश्चयस्य बाधकपदवेदनीयतया प्रकृते च प्रपञ्चसत्ताबाधनायामपि स्वरूपस्यानपबाधितत्वेनोपलम्भावश्यम्भावात्तावतैव च भोगप्रसंगस्य ज्ञानिनोऽप्यप्रत्याख्येयत्वात्। न खलु भोग्यस्य वस्तुसत्त्वमुपभोगांगम्। येन तद्बाधे भोगो न प्रसजेत्। नच सर्वजनीनानुभवसिद्धोऽयं स्वाप्नो भोगो विषयासत्त्वमात्रेण प्रतिषेद्धुमर्हः। तथासति सिद्धान्तेऽपि जीवन्मुक्तिकथातपस्विन्यै जलाञ्जलिर्वितीर्य्येत। बाधितैरेव तदीयोपभोगस्य त्वयाऽपि व्यवस्थापनीयत्वात्। अपिच यदाकदाचिद्बाधस्य भोगविघटकत्वे संसारोच्छेदः, भोगप्राक्कालबाधनं च स्वप्नेऽपि भोगप्रत्याख्यानाय नालं, जागरित एव तदीयविषयबाधस्य स्वीकृतत्वात्। तावतैव भरतादेरपि भोगस्य समर्थनसम्भवात् नच स्वाप्नजागरितोपभोगयोः स्वरूपतोऽस्ति कश्चिद्विशेष ऋते विषयस्थिरत्वास्थिरत्वादि। एवंचात्र बन्धपदेनोपदर्शितस्य भोगकर्माशयचक्रस्य दुष्प-

रिहरत्वेन बलवद्द्वेषप्रदर्शनात्तद्दानरूपोपरतौ विख्यातोऽप्युपादेयतामाहेति ध्वनितम् ॥ ३४ ॥

अथ मर्मस: सर्वप्रयत्नसीम्न उपशमादेव कृतकृत्यताऽस्तु कृतमिन्द्रियवस्त्युत्पत्तिविरोधिन्या दर्शितोपरत्या । अपिचेन्द्रियनिग्रहस्यापीतः पूर्वं दमत्वेनाऽवश्यसम्पादनीयत्वात्तावतैव निर्वाहे कथन्तरामुपरतिप्रवृत्तिः । कथंकारं वा दमादुपरतेर्विवेचनमित्याशंकामपनेतुमाह—दुर्निग्रहस्येति ।

ष—विवरणम्—

दुर्निग्रहस्याक्षगणस्य जातु प्राग्वासनोत्तम्भनतः प्रमादः ।
मा भूत् कदाचेति विविच्य भूयश्चित्तानुकारेण च तानि हन्यात् ॥ ३५ ॥

निवृत्तावप्युन्मज्जनशीलस्येत्यर्थः । एतेनोपरतेर्दमेनैवान्यथासिद्ध्याशंका निराकृता । अक्षगणस्य इन्द्रियसमूहस्य । प्राग् वासनोत्तम्भनतः पूर्वाभ्यासजपाटवापरपर्यायशक्त्युपष्टम्भात् । प्रमादः, पुनर्व्यापारप्रसंगः, कदाच माऽभूदिति । विविच्य भूयः चित्तानुकारेण प्रशान्तचित्तसादृश्येन तानि इन्द्रियाणि हन्यादिति योजना । अयमभिप्रायः, सत्यामपि शान्तौ दमप्राप्तान्यपि इन्द्रियाणि अनाद्यभ्यासवशाद्वासितवासनाबलेन भूयः कदाचिन्निग्रहात्प्रच्यवेरन्निति तद्व्यापारप्रागभावपरिपालनार्थं यत्न आवश्यक: । न चैतावता वैराग्यदमतितिक्षाणां वैयर्थ्यं, नवा ताभिरीदृशोपरतेरन्यथासिद्धिः । विषयासौन्दर्य्यावधारणजन्मनो वैतृष्ण्यस्य सकलोपजीव्यत्वेनानुपेक्षणीयत्वात् । दमस्येन्द्रियनिग्रहरूपस्य प्रागुक्तप्रयत्नविशेषपर्य्यवसितस्यापि दर्शितप्रागभावपरिपालनलक्षणोपरतौ प्रयोजकत्वेनाकर्ज्जनीयपौर्वापर्य्यतया वैयर्थ्यस्यैकशेषताया वाऽनवकाशात् । तितिक्षायाश्च विषयस्वरूपमात्रावभासरूपाया अकिंचित्करत्वदृष्टिसम्पादनद्वारा उपरतावुपयोगस्योक्तत्वाद्वैयर्थ्यशंकानवतारात् । वस्तुतस्तु बहिरिन्द्रियाणामुच्छृङ्खलानां श्रवणाद्यनुगुणविषयेष्वेव नियमनलक्षणो दमः प्रत्यङ्मुखीकरणरूपविधावेव पर्य्यवस्यति । तत्प्रकर्षायावश्यापेक्षणीया तूपरतिरभावरूपा बहिर्व्यापारस्वरसतारूपपाटवनिवृत्तिपर्य्यवसन्ना ततो भिन्नैवेति वैयर्थ्यान्यथासिद्ध्योर्नावकाशलेशोऽपीत्यवधेयम् ॥ ३५ ॥

समासेनोक्तामपि सन्यासलक्षणामुपरतिः प्रकारान्तरं विविच्योपपादयति,—कर्म्माणीति ।

षं—विवरणम्—कर्म्माणि नित्यान्यपि शुद्धिवृद्ध्याऽभ्यस्यतः काममसत्कराणि ।
न्यक्कृत्य बोधं प्रभवेयुरायुःक्षेपाय एवेति विमृश्य जह्यात् ॥ ३६ ॥